ओं नमः परमात्मने, श्री महागणपतये नमः,

श्री गुरुभ्यो नमः, ह॒रि॒ः ओं

# कृष्ण यजुर्वेदीय तैत्तिरीय संहिता पद पाठः

# (वाक्य सहित)

# सप्तमकाण्डे चतुर्थः प्रश्नः

**Notes:**

1. **Please refer to the book "TS Kandam 1" and "TS 1.1 pada paadam with Vaakyam" for notes and conventions used in this Compilation.**
2. **Please download our vedic compilations from our web site www.vedavms.in**

**Version 1.0** **September 30, 2021**

## Version Notes:

**This is now the current Version 1.0 dated September 30, 2021.**

1. This replaces the earlier version 0.1 dated March 31, 2020.

2. We have listened to the Pada Parayanam telecast by TTD channel. The corrections found have been updated . The corrections found and reported till September 30, 2021 are also updated.

3. Required convention, style and presentation improvements or standardisations has been done whereever applicable.

4. Notify your corrections / suggestions etc to our email id vedavms@gmail.com

## Earlier Versions

| | | |
|---|---|---|
| 1st | Version Number | 0.0 dated 30th September 2018 |
| 2nd | Version Number | 0.0 dated 31st January 2019 |
| 3rd | Version Number | 0.0 dated 30th November 2019 |
| 4th | Version Number | 0.1 dated 31st Mar 2020 |

Contents

7 कृष्ण यजुर्वेदीय तैत्तिरीय संहितायां पद पाठे

सप्तमं काण्डं 4

7.4 सप्तमकाण्डे चतुर्थः प्रश्नः – सत्रकर्मनिरूपणं.................. 4

ओं नमः परमात्मने, श्री महागणपतये नमः,

श्री गुरुभ्यो नमः, हरिः ओं

# 7 कृष्ण यजुर्वेदीय तैत्तिरीय संहितायां पद पाठे सप्तमं काण्डं

## 7.4 सप्तमकाण्डे चतुर्थः प्रश्नः – सत्रकर्मनिरूपणं

**TS 7.4.1.1**

बृहस्पतिरकामयत श्रन्मे देवा दधीरन् गच्छेयं पुरोधामिति स एतं चतुर्वि॒ꣳशतिरात्र–मपश्यत् तमा ऽहरत् तेनायजत ततो वै तस्मै श्रद्–देवा अदधतागच्छत् पुरोधां ँय एवं ँविद्वाꣳस–श्चतुर्वि॒ꣳशतिरात्र–मासते श्रदेभ्यो मनुष्या दधते गच्छन्ति पुरोधां ज्योतिर्गौरायुरिति त्र्यहा भवन्तीयं ँवाव ज्योतिरन्तरिक्षं गौरसावायु – [ ] 1

**TS 7.4.1.1 - Padam**

बृहस्पतिः । अकामयत । श्रत् । मे । देवाः । दधीरन्न् । गच्छेयम् । पुरोधामिति पुरः – धाम् । इति । सः । एतम् ।

चतुर्वि॒ꣳशतिरात्रमिति चतुर्वि॒ꣳशति – रात्रम् । अपश्यत् । तम् ।
एति । अहरत् । तेन । अयजत । ततः । वै । तस्मै । श्रत् । देवाः ।
अदधत । अगच्छत् । पुरोधामिति पुरः – धाम् । ये । एवम् ।
विद्वाꣳसः । चतुर्वि॒ꣳशतिरात्रमिति चतुर्वि॒ꣳशति – रात्रम् । आसते ।
श्रत् । एभ्यः । मनुष्याः । दधते । गच्छन्ति । पुरोधामिति पुरः–धाम् ।
ज्योतिः । गौः । आयुः । इति । त्र्यहा इति त्रि – अहाः । भवन्ति ।
इयम् । वाव । ज्योतिः । अन्तरिक्षम् । गौः । असौ । आयुः । **1 (50)**

**TS 7.4.1.2**

–रिमानेव लोकानभ्यारोहन्त्यभि पूर्वं त्र्यहा भवन्त्यभिपूर्वमेव सुवर्गं
ँलोकमभ्यारोहन्त्यसत्रं ँवा एतद्–यदछन्दोमं ँयच्छन्दोमा भवन्ति तेन
सत्रं देवता एव पृष्ठैरव रुन्धते पशूञ्छन्दोमैरोजो वै वीर्यं पृष्ठानि
पशवः छन्दोमा ओजस्येव वीर्ये पशुषु प्रति तिष्ठन्ति बृहद्रथन्तराभ्यां
ँयन्तीयं ँवाव रथन्तरमसौ बृहदाभ्यामेव – [ ] **2**

**TS 7.4.1.2 - Padam**

इमान् । एव । लोकान् । अभ्यारोहन्तीत्यभि – आरोहन्ति ।

अभिपूर्वमित्यभि – पूर्वम् । त्र्यहा इति त्रि – अहाः । भवन्ति ।

अभिपूर्वमित्यभि – पूर्वम् । एव । सुवर्गमिति सुवः – गम् ।

लोकम् । अभ्यारोहन्तीत्यभि – आरोहन्ति । असत्रम् । वै । एतत् ।

यत् । अछन्दोममित्यछन्दः–मम् । यत् । छन्दोमा इति छन्दः – माः ।

भवन्ति । तेन । सत्रम् । देवताः । एव । पृष्ठैः । अवेति । रुन्धते ।

पशून् । छन्दोमैरिति छन्दः–मैः । ओजः । वै । वीर्यम् । पृष्ठानि ।

पशवः । छन्दोमा इति छन्दः – माः । ओजसि । एव । वीर्ये ।

पशुषु । प्रतीति । तिष्ठन्ति । बृहद्रथन्तराभ्यामिति

बृहत् – रथन्तराभ्याम् । यन्ति । इयम् । वाव ।

रथन्तरमिति रथं – तरम् । असौ । बृहत् । आभ्याम् । एव । **2 (50)**

**TS 7.4.1.3**

यन्त्यथो अनयोरेव प्रति तिष्ठन्त्येते वै यज्ञस्याञ्जसायनी स्रुती

ताभ्यामेव सुवर्गं ँलोकं ँयन्ति चतुर्वि॒ꣳशतिरात्रो भवति

चतुर्वि॒ꣳशति–रर्द्धमासाः सँवथ्सरः सँवथ्सरः सुवर्गो लोकः

सँवथ्सर एव सुवर्गे लोके प्रति तिष्ठन्त्यथो चतुर्वि॒ꣳशत्यक्षरा गायत्री गायत्री ब्रह्मवर्चसं गायत्रियैव ब्रह्मवर्चसमव रुन्धते ऽतिरात्रावभितो भवतो ब्रह्मवर्चसस्य परिगृहीत्यै ॥ 3

**TS 7.4.1.3 - Padam**

यन्ति । अथो इति । अनयोः । एव । प्रतीति । तिष्ठन्ति । एते इति ।
वै । यज्ञस्य । अञ्जसायनी इत्यञ्जसा - अयनी । स्रुती इति ।
ताभ्याम् । एव । सुवर्गमिति सुवः - गम् । लोकम् । यन्ति ।
चतुर्वि॒ꣳशतिरात्र इति चतुर्वि॒ꣳशति - रात्रः । भवति ।
चतुर्वि॒ꣳशतिरिति चतुः - वि॒ꣳशतिः ।
अर्द्धमासा इत्यर्द्ध - मासाः ।
सँवथ्सर इति सं - वथ्सरः । सँवथ्सर इति सं - वथ्सरः ।
सुवर्ग इति सुवः - गः । लोकः । सँवथ्सर इति सं - वथ्सरे ।
एव । सुवर्ग इति सुवः - गे । लोके । प्रतीति । तिष्ठन्ति ।
अथो इति । चतुर्वि॒ꣳशत्यक्षरेति चतुर्वि॒ꣳशति - अक्षरा । गायत्री ।
गायत्री । ब्रह्मवर्चसमिति ब्रह्म - वर्चसम् । गायत्रिया । एव ।

ब्रह्मवर्चसमिति ब्रह्म – वर्चसम् । अवेति । रुन्धते ।

अतिरात्रावित्यति – रात्रौ । अभितः । भवतः । ब्रह्मवर्चसस्येति

ब्रह्म – वर्चसस्य । परिगृहीत्या इति परि – गृहीत्यै ॥ **3 (45)**

*(असावायु – राभ्यामेव – पञ्चचत्वारि॑ꣳशच्च) (A1)*

**TS 7.4.2.1**

यथा वै मनुष्या एवं देवा अग्र आसन् ते ऽकामयन्तावर्तिं पाप्मानं मृत्युमपहत्य दैवीꣳ सꣳसदं गच्छेमेति त एतं चतुर्विꣳशतिरात्र–मपश्यन् तमा ऽहरन् तेनायजन्त ततो वै ते ऽवर्तिं पाप्मानं मृत्युमपहत्य दैवीꣳ सꣳसदमगच्छन्. य एवं ँविद्वाꣳस–श्चतुर्विꣳशतिरात्र–मासते ऽवर्तिमेव पाप्मान–मपहत्य श्रियं गच्छन्ति श्रीर्. हि मनुष्यस्य – [ ] 4

**TS 7.4.2.1 - Padam**

यथा । वै । मनुष्याः । एवम् । देवाः । अग्रे । आसन्न् । ते ।

अकामयन्त । अवर्तिम् । पाप्मानम् । मृत्युम् । अपहत्येत्यप–हत्य ।

दैवीम् । सꣳसदमिति सं – सदम् । गच्छेम । इति । ते । एतम् ।

चतुर्विꣳशतिरात्रमिति चतुर्विꣳशति – रात्रम् । अपश्यन्न् । तम् ।

एति । अहरन्न् । तेन । अयजन्त । ततः । वै । ते । अवर्तिम् ।
पाप्मानम् । मृत्युम् । अपहत्येत्यप– हत्य । दैवीम् ।
स॒ꣳसदमिति सं – सदम् । अगच्छन्न् । ये । एवम् । विद्वा॒ꣳसः ।
चतुर्वि॒ꣳशतिरात्रमिति चतुर्वि॒ꣳशति – रात्रम् । आसते । अवर्तिम् ।
एव । पाप्मानम् । अपहत्येत्यप– हत्य । श्रियम् । गच्छन्ति । श्रीः ।
हि । मनुष्यस्य । **4 (50)**

**TS 7.4.2.2**

दैवी स॒ꣳसज्ज्योतिरतिरात्रो भवति सुवर्गस्य लोकस्यानुख्यात्यै
पृष्ठ्यः षडहो भवति षड् वा ऋतवः सँवथ्सरस्तं मासा अर्द्धमासा
ऋतवः प्रविश्य दैवी॒ꣳ स॒ꣳसदमगच्छन्. य एवं ँविद्वा॒ꣳस–
श्चतुर्वि॒ꣳशतिरात्रमासते सँवथ्सरमेव प्रविश्य वस्यसी॒ꣳ स॒ꣳसदं
गच्छन्ति त्रय स्त्रयस्त्रि॒ꣳशा अवस्ताद्–भवन्ति त्रयस्त्रयस्त्रि॒ꣳशाः
परस्तात् त्रय स्त्रि॒ꣳशैरेवोभयतो ऽवर्तिं पाप्मानमपहत्य दैवी॒ꣳ
स॒ꣳसदं मद्ध्यतो – [ ] **5**

**TS 7.4.2.2 - Padam**

दैवी । स॒ꣳ॒सदिति॒ सं – सत् । ज्योतिः । अ॒ति॒रा॒त्र इत्यति॒ – रा॒त्रः ।
भ॒व॒ति॒ । सु॒व॒र्गस्येति॒ सुवः – ग॒स्य । लो॒कस्य । अ॒नु॒ख्या॒त्या॒
इत्य॒नु –ख्या॒त्यै॒ । पृष्ठ्यः । ष॒ड॒ह इति॒ षट् – अ॒हः । भ॒व॒ति॒ । षट् ।
वै । ऋ॒तवः । सँ॒व॒थ्स॒र इति॒ सं – व॒थ्स॒रः । तम् । मासाः ।
अ॒र्द्ध॒मा॒सा इत्य॒र्द्ध – मा॒साः । ऋ॒तवः । प्र॒विश्येति॒ प्र – विश्य ।
दैवीम् । स॒ꣳ॒स॒दमिति॒ सं – स॒दम् । अ॒ग॒च्छ॒न्न् । ये । ए॒वम् ।
वि॒द्वाꣳसः । च॒तु॒र्वि॒ꣳ॒श॒ति॒रा॒त्रमिति॒ चतुर्विꣳशति – रा॒त्रम् । आस॒ते ।
सँ॒व॒थ्स॒रमिति॒ सं – व॒थ्स॒रम् । ए॒व । प्र॒विश्येति॒ प्र – विश्य ।
वस्य॒सीम् । स॒ꣳ॒स॒दमिति॒ सं – स॒दम् । ग॒च्छ॒न्ति॒ । त्रयः ।
त्र॒य॒स्त्रि॒ꣳ॒शा इति॒ त्रयः – त्रि॒ꣳ॒शाः । अ॒वस्ता॒त् । भ॒व॒न्ति॒ । त्रयः ।
त्र॒य॒स्त्रि॒ꣳ॒शा इति॒ त्रयः – त्रि॒ꣳ॒शाः । प॒रस्ता॒त् ।
त्र॒य॒स्त्रि॒ꣳ॒शैरिति॒ त्रयः – त्रि॒ꣳ॒शैः । ए॒व । उ॒भ॒यतः । अव॒र्तिम् ।
पा॒प्मान॒म् । अ॒प॒हत्येत्य॒प – ह॒त्य । दैवी॒म् ।
स॒ꣳ॒स॒दमिति॒ सं – स॒दम् । म॒द्ध्य॒तः । **5 (50)**

**TS 7.4.2.3**

गच्छन्ति पृष्ठानि हि दैवी स॒ꣳसज्जामि वा एतत् कुर्वन्ति यत् त्रय

स्त्रयस्त्रि॒ꣳशा अन्वञ्चो मद्ध्ये ऽनिरुक्तो भवति तेनाजाम्यूर्द्ध्वानि

पृष्ठानि भवन्त्यूर्द्ध्वाः छन्दोमा उभाभ्याꣳ रूपाभ्याꣳ सुवर्गं ँलोकं

ँयन्त्यसत्रं ँवा एतद्–यदछन्दोमं ँयच्छन्दोमा भवन्ति तेन सत्रं देवता

एव पृष्ठैरव रुन्धते पशूञ्छन्दोमैरोजो वै वीर्यं पृष्ठानि पशवः– [ ] **6**

**TS 7.4.2.3 - Padam**

गच्छन्ति । पृष्ठानि । हि । दैवी । स॒ꣳसदिति सं – सत् । जामि ।

वै । एतत् । कुर्वन्ति । यत् । त्रयः । त्रयस्त्रि॒ꣳशा इति

त्रयः–त्रि॒ꣳशाः । अन्वञ्चः । मद्ध्ये । अनिरुक्त इत्यनिः – उक्तः ।

भवति । तेन । अजामि । ऊर्द्ध्वानि । पृष्ठानि । भवन्ति । ऊर्द्ध्वाः ।

छन्दोमा इति छन्दः – माः । उभाभ्याम् । रूपाभ्याम् ।

सुवर्गमिति सुवः – गम् । लोकम् । यन्ति । असत्रम् । वै । एतत् ।

यत् । अछन्दोममित्यछन्दः–मम् । यत् । छन्दोमा इति छन्दः– माः ।

भवन्ति । तेन । सत्रम् । देवताः । एव । पृष्ठैः । अवेति । रुन्धते ।

पशून् । छन्दोमैरिति छन्दः – मैः । ओजः । वै । वीर्यम् । पृष्ठानि ।

पशवः । **6 (50)**

**TS 7.4.2.4**

छन्दोमा ओजस्येव वीर्ये पशुषु प्रति तिष्ठन्ति त्रय स्त्रयस्त्रि॒ꣳशा

अवस्ताद्–भवन्ति त्रय स्त्रयस्त्रि॒ꣳशाः परस्तान्मद्ध्ये पृष्ठान्युरो वै

त्रयस्त्रि॒ꣳशा आत्मा पृष्ठान्यात्मन एव तद्–यजमानाः शर्म

नह्यन्ते ऽनार्त्यै बृहद्रथन्तराभ्यां ँयन्तीयं ँवाव रथन्तरमसौ

बृहदाभ्यामेव यन्त्यथो अनयोरेव प्रति तिष्ठन्त्येते वै

यज्ञस्याञ्जसायनी स्रुती ताभ्यामेव – [ ] **7**

**TS 7.4.2.4 - Padam**

छन्दोमा इति छन्दः – माः । ओजसि । एव । वीर्ये । पशुषु ।

प्रतीति । तिष्ठन्ति । त्रयः । त्रयस्त्रि॒ꣳशा इति त्रयः – त्रि॒ꣳशाः ।

अवस्तात् । भवन्ति । त्रयः । त्रयस्त्रि॒ꣳशा इति त्रयः – त्रि॒ꣳशाः ।

परस्तात् । मद्ध्ये । पृष्ठानि । उरः । वै । त्रयस्त्रि॒ꣳशा इति

त्रयः – त्रि॒ꣳशाः । आत्मा । पृष्ठानि । आत्मने । एव । तत् ।

यजमानाः । शर्म । नह्यन्ते । अनार्त्यै । बृहद्रथन्तराभ्यामिति

बृहत् – रथन्तराभ्याम् । यन्ती । इयम् । वाव । रथन्तरमिति

रथं – तरम् । असौ । बृहत् । आभ्याम् । एव । यन्ति । अथो इति ।

अनयोः । एव । प्रतीति । तिष्ठन्ति । एते इति । वै । यज्ञस्य ।

अञ्जसायनी इत्यञ्जसा – अयनी । स्रुती इति । ताभ्याम् ।

एव । **7 (50)**

**TS 7.4.2.5**

सुवर्गं ँलोकं ँयन्ति पराञ्चो वा एते सुवर्गं ँलोकमभ्यारोहन्ति

ये पराचीनानि पृष्ठान्युपयन्ति प्रत्यङ् षडहो भवति प्रत्यवरूढ्या अथो

प्रतिष्ठित्या उभयोर्लोकयोर् ऋद्ध्वोत् तिष्ठन्ति त्रिवृतो ऽधि त्रिवृतमुप

यन्ति स्तोमानाꣳ संपत्त्यै प्रभवाय ज्योतिरग्निष्टोमो भवत्ययं ँवाव स

क्षयो ऽस्मादेव तेन क्षयान्न यन्ति चतुर्विꣳशतिरात्रो भवति

चतुर्विꣳशति–रर्द्धमासाः सँवथ्सरः ( ) सँवथ्सरः सुवर्गो लोकः

सँवथ्सर एव सुवर्गे लोके प्रति तिष्ठन्त्यथो चतुर्विꣳशत्यक्षरा गायत्री

गायत्री ब्रह्मवर्चसं गायत्रियैव ब्रह्मवर्चसमव रुन्धते ऽतिरात्रावभितो

भवतो ब्रह्मवर्चसस्य परिगृहीत्यै ॥ **8**

**TS 7.4.2.5 - Padam**

सुवर्गमिति सुवः – गम् । लोकम् । यन्ति । पराञ्चः । वै । एते ।
सुवर्गमिति सुवः–गम् । लोकम् । अभ्यारोहन्तीत्यभि – आरोहन्ति ।
ये । पराचीनानि । पृष्ठानि । उपयन्तीत्युप – यन्ति । प्रत्यङ् । षडह
इति षट् – अहः । भवति । प्रत्यवरूढ्या इति प्रति – अवरूढ्यै ।
अथो इति । प्रतिष्ठित्या इति प्रति – स्थित्यै । उभयोः । लोकयोः ।
ऋद्ध्वा । उदिति । तिष्ठन्ति । त्रिवृत इति त्रि – वृतः । अधीति ।
त्रिवृतमिति त्रि – वृतम् । उपेति । यन्ति । स्तोमानाम् ।
संपत्त्या इति सं – पत्त्यै । प्रभवायेति प्र – भवाय । ज्योतिः ।
अग्निष्टोम इत्यग्नि–स्तोमः । भवति । अयम् । वाव । सः । क्षयः ।
अस्मात् । एव । तेन । क्षयात् । न । यन्ति । चतुर्विꣳशतिरात्र इति
चतुर्विꣳशति–रात्रः । भवति । चतुर्विꣳशतिरिति चतुः–विꣳशतिः ।
अर्द्धमासा इत्यर्द्ध – मासाः । सꣳवथ्सर इति सं – वथ्सरः ( ) ।
सꣳवथ्सर इति सं – वथ्सरः । सुवर्ग इति सुवः – गः । लोकः ।
सꣳवथ्सर इति सं–वथ्सरे । एव । सुवर्ग इति सुवः – गे । लोके ।

प्रतीति । तिष्ठन्ति । अथो इति ।

चतुर्वि॒ꣳशत्यक्षरेति चतुर्वि॒ꣳशति- अक्षरा । गायत्री । गायत्री ।

ब्रह्मवर्चसमिति ब्रह्म - वर्चसम् । गायत्रिया । एव । ब्रह्मवर्चसमिति

ब्रह्म - वर्चसम् । अवेति । रुन्धते । अतिरात्रावित्यति - रात्रौ ।

अभितः । भवतः । ब्रह्मवर्चस्येति ब्रह्म - वर्चसस्य ।

परिगृहीत्या इति परि - गृहीत्यै ॥ **8 (74)**

***(मनुष्यस्य - मध्यतः - पशव - स्ताभ्यामेव - सँवथ्सर - श्चतुर्वि॒ꣳशतिश्च) (A2)***

**TS 7.4.3.1**

ऋक्षा वा इय-मलोमका ऽऽसीथ् साऽकामयतौषधीभि-र्वनस्पतिभिः प्र जायेयेति सैता स्त्रि॒ꣳशत॒ꣳ रात्रीरपश्यत् ततो वा इयमोषधीभि-र्वनस्पतिभिः प्राजायत ये प्रजाकामाः पशुकामाः स्युस्त एता आसीरन् प्रैव जायन्ते प्रजया पशुभिरियं ँवा अक्षुद्ध्यथ् सैतां ँविराजमपश्यत् तामात्मन् धित्वा ऽन्नाद्यमवारुन्धौषधी - [ ] **9**

**TS 7.4.3.1 - Padam**

ऋक्षा । वै । इयम् । अलोमका । आसीत् । सा । अकामयत ।

ओषधीभिरित्योषधि–भिः । वनस्पतिभिरिति वनस्पति–भिः । प्रेति ।

जायेय । इति । सा । एताः । त्रि॒ꣳशतम् । रात्रीः । अपश्यत् । ततः ।

वै । इयम् । ओषधीभिरित्योषधि – भिः । वनस्पतिभिरिति

वनस्पति –भिः । प्रेति । अजायत । ये । प्रजाकामा

इति प्रजा – कामाः । पशुकामा इति पशु – कामाः । स्युः । ते ।

एताः । आसीरन्न् । प्रेति । एव । जायन्ते । प्रजयेति प्र–जया ।

पशुभिरिति पशु–भिः । इयम् । वै । अक्षुद्ध्यत् । सा । एताम् ।

विराजमिति वि – राजम् । अपश्यत् । ताम् । आत्मन्न् । धित्वा ।

अन्नाद्यमित्यन्न – अद्यम् । अवेति । अरुन्ध । ओषधीः । **9 (50)**

**TS 7.4.3.2**

–र्वनस्पतीन् प्रजां पशून् तेनावर्द्धत सा जेमानं महिमान–

मगच्छद्–य एवं ँविद्वा॒ꣳस एता आसते विराजमेवाऽऽत्मन्

धित्वा ऽन्नाद्यमव रुन्धते वर्द्धन्ते प्रजया पशुभिर्जेमानं महिमानं

गच्छन्ति ज्योतिरतिरात्रो भवति सुवर्गस्य लोकस्यानुख्यात्यै पृष्ठ्यः

षडहो भवति षड् वा ऋतवः षट् पृष्ठानि पृष्ठै–रेवर्तूनन्वारोहन्त्यृतुभिः सँवथ्सरं ते सँवथ्सर एव – [ ] 10

**TS 7.4.3.2 - Padam**

वनस्पतीन् । प्रजामिति प्र – जाम् । पशून् । तेन । अवर्द्धत । सा । जेमानम् । महिमानम् । अगच्छत् । ये । एवम् । विद्वाꣳसः । एताः । आसते । विराजमिति वि–राजम् । एव । आत्मन्न् । धित्वा । अन्नाद्यमित्यन्न – अद्यम् । अवेति । रुन्धते । वर्द्धन्ते । प्रजयेति प्र – जया । पशुभिरिति पशु – भिः । जेमानम् । महिमानम् । गच्छन्ति । ज्योतिः । अतिरात्र इत्यति – रात्रः । भवति । सुवर्गस्येति सुवः – गस्य । लोकस्य । अनुख्यात्या इत्यनु – ख्यात्यै । पृष्ठ्यः । षडह इति षट् – अहः । भवति । षट् । वै । ऋतवः । षट् । पृष्ठानि । पृष्ठैः । एव । ऋतून् । अन्वारोहन्तीत्यनु – आरोहन्ति । ऋतुभिरित्यृतु – भिः । सँवथ्सरमिति सं – वथ्सरम् । ते । सँवथ्सर इति सं – वथ्सरे । एव । **10 (50)**

**TS 7.4.3.3**

प्रति तिष्ठन्ति त्रयस्त्रि॒ꣳशात् त्रयस्त्रि॒ꣳशमुप यन्ति य॒ज्ञस्य॒ सन्तत्या॒

अथो॒ प्र॒जापति॒र्वै त्रयस्त्रि॒ꣳशः प्र॒जापतिमे॒वाऽऽ रभन्ते॒ प्रतिष्ठित्यै

त्रि॒णवो भवति॒ विजित्या एकवि॒ꣳशो भवति॒ प्रतिष्ठित्या॒ अथो॒

रुचमे॒वाऽऽत्मन् दधते त्रि॒वृदग्निष्टु॒द्-भवति पा॒प्मानमे॒व ते॒न

निर्द॒हन्ते ऽथो॒ तेजो॒ वै त्रि॒वृत् तेज ए॒वाऽऽत्मन् दधते पञ्चद॒श

इन्द्रस्तो॒मो भवतीन्द्रि॒यमे॒वाव - [ ] **11**

**TS 7.4.3.3 - Padam**

प्रतीति । ति॒ष्ठ॒न्ति॒ । त्र॒य॒स्त्रि॒ꣳ॒शादिति त्रयः - त्रि॒ꣳ॒शात् ।

त्र॒य॒स्त्रि॒ꣳ॒शमिति त्रयः - त्रि॒ꣳ॒शम् । उपेति । य॒न्ति॒ । य॒ज्ञस्य॑ ।

सन्तत्या॒ इति॒ सं - त॒त्यै॒ । अथो॒ इति । प्र॒जापति॒रिति प्र॒जा-प॒ति॒ः ।

वै । त्र॒य॒स्त्रि॒ꣳ॒श इति त्रयः-त्रि॒ꣳ॒शः । प्र॒जापति॒मिति प्र॒जा-प॒ति॒म् ।

ए॒व । एति । र॒भ॒न्ते॒ । प्रतिष्ठित्या॒ इति॒ प्रति - स्थि॒त्यै॒ । त्रि॒ण॒व इति

त्रि - न॒वः । भ॒व॒ति॒ । विजित्या॒ इति॒ वि - जि॒त्यै॒ । ए॒क॒वि॒ꣳ॒श

इत्येक - वि॒ꣳ॒शः । भ॒व॒ति॒ । प्रतिष्ठित्या॒ इति॒ प्रति - स्थि॒त्यै॒ ।

अथो॒ इति । रुचम् । ए॒व । आ॒त्मन्न् । द॒ध॒ते॒ । त्रि॒वृदिति त्रि - वृत् ।

अग्निष्टुदित्यग्नि – स्तुत् । भवति । पाप्मानम् । एव । तेन । निरिति । दहन्ते । अथो इति । तेजः । वै । त्रिवृदिति त्रि–वृत् । तेजः । एव । आत्मन्न् । दधते । पञ्चदश इति पञ्च – दशः । इन्द्रस्तोम इतीन्द्र – स्तोमः । भवति । इन्द्रियम् । एव । अवेति । **11 (50)**

**TS 7.4.3.4**

रुन्धते सप्तदशो भवत्यन्नाद्यस्यावरुद्ध्या अथो प्रैव तेन जायन्त एकविꣳशो भवति प्रतिष्ठित्या अथो रुचमेवाऽऽत्मन् दधते चतुर्विꣳशो भवति चतुर्विꣳशति–रर्धमासाः सँवथ्सरः सँवथ्सरः सुवर्गो लोकः सँवथ्सर एव सुवर्गे लोके प्रति तिष्ठन्त्यथो एष वै विषूवान्. विषूवन्तो भवन्ति य एवं ँविद्वाꣳस एता आसते चतुर्विꣳशात् पृष्ठान्युप यन्ति सँवथ्सर एव प्रतिष्ठाय – [ ] **12**

**TS 7.4.3.4 - Padam**

रुन्धते । सप्तदश इति सप्त – दशः । भवति । अन्नाद्यस्येत्यन्न– अद्यस्य । अवरुद्ध्या इत्यव–रुद्ध्यै । अथो इति । प्रेति । एव । तेन । जायन्ते । एकविꣳश इत्येक – विꣳशः ।

भवति । प्रतिष्ठित्या इति प्रति – स्थित्यै । अथो इति । रुचम् । एव । आत्मन्न् । दधते । चतुर्वि॒ꣳश इति चतुः – वि॒ꣳशः । भवति । चतुर्वि॒ꣳशतिरिति चतुः – वि॒ꣳशतिः ।

अर्द्धमासा इत्यर्द्ध – मासाः । सꣳवथ्सर इति सं – वथ्सरः । सꣳवथ्सर इति सं – वथ्सरः । सुवर्ग इति सुवः – गः । लोकः । सꣳवथ्सर इति सं – वथ्सरे । एव । सुवर्ग इति सुवः – गे । लोके । प्रतीति । तिष्ठन्ति । अथो इति । एषः । वै । विषूवानिति विषु – वान् । विषूवन्त इति विषु – वन्तः । भवन्ति । ये । एवम् । विद्वाꣳसः । एताः । आसते । चतुर्वि॒ꣳशादिति चतुः – वि॒ꣳशात् । पृष्ठानि । उपेति । यन्ति । सꣳवथ्सर इति सं – वथ्सरे । एव । प्रतिष्ठायेति प्रति–स्थाय । **12 (50)**

**<u>TS 7.4.3.5</u>**

देवता अभ्यारोहन्ति त्रयस्त्रि॒ꣳशात् त्रयस्त्रि॒ꣳशमुप यन्ति त्रयस्त्रि॒ꣳशद्–वै देवता देवतास्वेव प्रति तिष्ठन्ति त्रिणवो भवतीमे वै लोकास्त्रिणव एष्वेव लोकेषु प्रति तिष्ठन्ति द्वावेकवि॒ꣳशौ भवतः

प्रतिष्ठित्या अथो रुचमेवाऽऽत्मन् दधते बहवः षोडशिनो भवन्ति

तस्माद्-बहवः प्रजासु वृषाणो यदेते स्तोमा व्यतिषक्ता भवन्ति

तस्मादिय -मोषधीभि-र्वनस्पतिभि-र्व्यतिषक्ता - [ ] **13**

**TS 7.4.3.5 - Padam**

देवताः । अभ्यारोहन्तीत्यभि - आरोहन्ति । त्रयस्त्रि॒ꣳशादिति त्रयः - त्रि॒ꣳशात् । त्रयस्त्रि॒ꣳशमिति त्रय - त्रि॒ꣳशम् । उपेति । यन्ति । त्रयस्त्रि॒ꣳशदिति त्रयः - त्रि॒ꣳशत् । वै । देवताः । देवतासु । एव । प्रतीति । तिष्ठन्ति । त्रिणव इति त्रि - नवः । भवति । इमे । वै । लोकाः । त्रिणव इति त्रि - नवः । एषु । एव । लोकेषु । प्रतीति । तिष्ठन्ति । द्वौ । एकवि॒ꣳशावित्येक - वि॒ꣳशौ । भवतः । प्रतिष्ठित्या इति प्रति - स्थित्यै । अथो इति । रुचम् । एव । आत्मन्न् । दधते । बहवः । षोडशिनः । भवन्ति । तस्मात् । बहवः । प्रजास्विति प्र - जासु । वृषाणः । यत् । एते । स्तोमाः । व्यतिषक्ता इति वि - अतिषक्ताः । भवन्ति । तस्मात् । इयम् ।

ओषधीभिरित्योषधि – भिः । वनस्पतिभिरिति वनस्पति – भिः ।
व्यतिषक्तेति वि – अतिषक्ता । **13 (50)**

**TS 7.4.3.6**

व्यतिषज्यन्ते प्रजया पशुभिर्य एवं ँविद्वा७ँस एता आसते ऽक्लृप्ता वा एते सुवर्गं ँलोकं ँयन्त्युच्चावचान्. हि स्तोमानुपयन्ति यदेत ऊर्द्ध्वाः क्लृप्ताः स्तोमा भवन्ति क्लृप्ता एव सुवर्गं ँलोकं ँयन्त्युभयोरेभ्यो लोकयोः कल्पते त्रि७ँशदेता स्त्रि७ँशदक्षरा विराडन्नं विराड् विराजैवान्नाद्यमव रुन्धते ऽतिरात्रावभितो भवतो ऽन्नाद्यस्य परिगृहीत्यै ॥ **14**

**TS 7.4.3.6 - Padam**

व्यतिषज्यन्त इति वि – अतिषज्यन्ते । प्रजयेति प्र – जया । पशुभिरिति पशु – भिः । ये । एवम् । विद्वा७ँसः । एताः । आसते । अक्लृप्ताः । वै । एते । सुवर्गमिति सुवः – गम् । लोकम् । यन्ति । उच्चावचान् । हि । स्तोमान् । उपयन्तीत्युप – यन्ति । यत् । एते । ऊर्द्ध्वाः । क्लृप्ताः । स्तोमाः । भवन्ति । क्लृप्ताः । एव । सुवर्गमिति सुवः – गम् । लोकम् । यन्ति । उभयोः । एभ्यः ।

लोकयोः । कल्पते । त्रि॒ꣳशत् । एताः ।

त्रिꣳशदक्षरेति त्रिꣳशत् – अक्षरा । विराडिति वि – राट् । अन्नम् ।

विराडिति वि – राट् । विराजेति वि – राजा । एव ।

अन्नाद्यमित्यन्न–अद्यम् । अवेति । रुन्धते । अतिरात्रावित्यति – रात्रौ ।

अभितः । भवतः । अन्नाद्यस्येत्यन्न – अद्यस्य ।

परिगृहीत्या इति परि – गृहीत्यै ॥ **14 (49)**

***(ओषधीः – सँवथ्सर एवा – व – प्रतिष्ठाय – व्यतिषक्त्यै – कान्नपञ्चाशच्च) (A3)***

**TS 7.4.4.1**

प्रजापतिः सुवर्गं ँलोकमैत् तं देवा येनयेन छन्दसा ऽनु प्रायुञ्जत तेन नाऽऽप्नुवन् त एता द्वात्रिꣳशतꣳ रात्रीरपश्यन् द्वात्रिꣳशदक्षरा ऽनुष्टुगा–नुष्टुभः प्रजापतिः स्वेनैव छन्दसा प्रजापति–माप्त्वा ऽभ्यारुह्य सुवर्गं ँलोकमायन्. य एवं ँविद्वाꣳस एता आसते द्वात्रिꣳशदेता द्वात्रिꣳशदक्षरा ऽनुष्टुगा–नुष्टुभः प्रजापतिः स्वेनैव छन्दसा प्रजापतिमाप्त्वा श्रियं गच्छन्ति – [ ] **15**

**TS 7.4.4.1 - Padam**

प्रजापतिरिति प्रजा – पतिः । सुवर्गमिति सुवः – गम् । लोकम् ।
ऐत् । तम् । देवाः । येनयेनेति येन – येन । छन्दसा । अनु । प्रेति ।
अयुञ्जत । तेन । न । आप्नुवन्न् । ते । एताः । द्वात्रि॒ꣳशतम् ।
रात्रीः । अपश्यन्न् । द्वात्रि॒ꣳशदक्षरेति द्वात्रि॒ꣳशत् – अक्षरा ।
अनुष्टुगित्यनु – स्तुक् । आनुष्टुभ इत्यानु – स्तुभः । प्रजापतिरिति
प्रजा–पतिः । स्वेन । एव । छन्दसा । प्रजापतिमिति प्रजा–पतिम् ।
आप्त्वा । अभ्यारुह्येत्यभि – आरुह्य । सुवर्गमिति सुवः – गम् ।
लोकम् । आयन्न् । ये । एवम् । विद्वा॒ꣳसः । एताः । आसते ।
द्वात्रि॒ꣳशत् । एताः । द्वात्रि॒ꣳशदक्षरेति द्वात्रि॒ꣳशत् – अक्षरा ।
अनुष्टुगित्यनु – स्तुक् । आनुष्टुभ इत्यानु – स्तुभः । प्रजापतिरिति
प्रजा–पतिः । स्वेन । एव । छन्दसा । प्रजापतिमिति प्रजा–पतिम् ।
आप्त्वा । श्रियम् । गच्छन्ति । **15 (50)**

**TS 7.4.4.2**

श्रीर्. हि मनुष्यस्य सुवर्गो लोको द्वात्रि॒ꣳशदेता द्वात्रि॒ꣳशदक्षरा–
ऽनुष्टुग्–वागनुष्टुफ् सर्वामेव वाचमाप्नुवन्ति सर्वे वाचो वदितारो

भवन्ति सर्वे हि श्रियं गच्छन्ति ज्योतिर्गौरायुरिति त्र्यहा भवन्तीयं
ँवाव ज्योतिरन्तरिक्षं गौरसावायुरिमानेव लोकानभ्यारोहन्त्यभिपूर्वं
त्र्यहा भवन्त्यभिपूर्वमेव सुवर्गं ँलोकमभ्यारोहन्ति बृहद्रथन्तराभ्यां
ँयन्ती – [ ] **16**

**<u>TS 7.4.4.2 - Padam</u>**

श्रीः । हि । मनुष्यस्य । सुवर्ग इति सुवः–गः । लोकः ।
द्वात्रि(ग्ं)शत् । एताः । द्वात्रि(ग्ं)शदक्षरेति द्वात्रि(ग्ं)शत् – अक्षरा ।
अनुष्टुगित्यनु – स्तुक् । वाक् । अनुष्टुबित्यनु – स्तुप् । सर्वाम् ।
एव । वाचम् । आप्नुवन्ति । सर्वे । वाचः । वदितारः । भवन्ति ।
सर्वे । हि । श्रियम् । गच्छन्ति । ज्योतिः । गौः । आयुः । इति ।
त्र्यहा इति त्रि – अहाः । भवन्ति । इयम् । वाव । ज्योतिः ।
अन्तरिक्षम् । गौः । असौ । आयुः । इमान् । एव । लोकान् ।
अभ्यारोहन्तीत्यभि – आरोहन्ति । अभिपूर्वमित्यभि – पूर्वम् ।
त्र्यहा इति त्रि–अहाः । भवन्ति । अभिपूर्वमित्यभि – पूर्वम् । एव ।

सुवर्गमिति सुवः – गम् । लोकम् । अभ्यारोहन्तीत्यभि–आरोहन्ति ।
बृहद्रथन्तराभ्यामिति बृहत् – रथन्तराभ्याम् । यन्ति । **16 (50)**

**TS 7.4.4.3**

–यं ँवाव रथन्तरमसौ बृहदाभ्यामेव यन्त्यथो अनयोरेव प्रति
तिष्ठन्त्येते वै यज्ञस्याञ्जसायनी स्रुती ताभ्यामेव सुवर्गं ँलोकं ँयन्ति
पराञ्चो वा एते सुवर्गं ँलोकमभ्यारोहन्ति ये पराचस्त्र्यहानुपयन्ति
प्रत्यङ् त्र्यहो भवति प्रत्यवरूढ्या अथो प्रतिष्ठित्या उभयोर्लोकयोर्.
ऋद्ध्वोत् तिष्ठन्ति द्वात्रि॑ꣳशदेता स्तासां ँया स्त्रि॑ꣳशत्
त्रि॑ꣳशदक्षरा ( ) विराडन्नं ँविराड् विराजैवाऽन्नाद्यमव रुन्धते ये
द्वे अहोरात्रे एव ते उभाभ्या॑ꣳ रूपाभ्या॑ꣳ सुवर्गं ँलोकं
ँयन्त्यतिरात्रावभितो भवतः परिगृहीत्यै ॥ **17**

**TS 7.4.4.3 - Padam**

इयम् । वाव । रथन्तरमिति रथं – तरम् । असौ । बृहत् । आभ्याम् ।
एव । यन्ति । अथो इति । अनयोः । एव । प्रतीति । तिष्ठन्ति ।
एते इति । वै । यज्ञस्य । अञ्जसायनी इत्यञ्जसा – अयनी ।
स्रुती इति । ताभ्याम् । एव । सुवर्गमिति सुवः – गम् । लोकम् ।

यन्ति । पराञ्चः । वै । एते । सुवर्गमिति सुवः - गम् । लोकम् ।
अभ्यारोहन्तीत्यभि - आरोहन्ति । ये । पराचः । त्र्यहानिति
त्रि - अहान् । उपयन्तीत्युप - यन्ति । प्रत्यङ् । त्र्यहा इति
त्रि - अहः । भवति । प्रत्यवरूढ्या इति प्रति - अवरूढ्यै ।
अथो इति । प्रतिष्ठित्या इति प्रति - स्थित्यै । उभयोः । लोकयोः ।
ऋद्ध्वा । उदिति । तिष्ठन्ति । द्वात्रिꣳशत् । एताः । तासाम् । याः ।
त्रिꣳशत् । त्रिꣳशदक्षरेति त्रिꣳशत् - अक्षरा ( ) ।
विराडिति वि - राट् । अन्नम् । विराडिति वि - राट् । विराजेति
वि - राजा । एव । अन्नाद्यमित्यन्न - अद्यम् । अवेति । रुन्धते ।
ये इति । द्वे इति । अहोरात्रे इत्यहः - रात्रे । एव । ते इति ।
उभाभ्याम् । रूपाभ्याम् । सुवर्गमिति सुवः - गम् । लोकम् । यन्ति ।
अतिरात्रावित्यति - रात्रौ । अभितः । भवतः ।
परिगृहीत्या इति परि - गृहीत्यै ॥ **17 (72)**

*(गच्छन्ति - यन्ति - त्रिꣳशदक्षरा - द्वाविꣳशतिश्च) (A4)*

**TS 7.4.5.1**

द्वे वाव देवसत्रे द्वादशाहश्चैव त्रयस्त्रि॒ꣳशदहश्च य एवं

विद्वाꣳस स्त्रयस्त्रिꣳशदह–मासते साक्षादेव देवता अभ्यारोहन्ति

यथा खलु वै श्रेयानभ्यारूढः कामयते तथा करोति यद्यवविद्ध्यति

पापीयान् भवति यदि नावविद्ध्यति सदृङ् य एवं

विद्वाꣳसस्त्रयस्त्रिꣳ–शदहमासते वि पाप्मना भ्रातृव्येणाऽऽ वर्तन्ते

ऽहर्भाजो वा एता देवा अग्र आ ऽहर – [ ] **18**

**TS 7.4.5.1 - Padam**

द्वे इति । वाव । देवसत्रे इति देव – सत्रे । द्वादशाह इति

द्वादश–अहः । च । एव । त्रयस्त्रिꣳशदह इति त्रयस्त्रिꣳशत्–अहः ।

च । ये । एवम् । विद्वाꣳसः । त्रयस्त्रिꣳशदहमिति

त्रयस्त्रिꣳशत्–अहम् । आसते । साक्षादिति स – अक्षात् । एव ।

देवताः । अभ्यारोहन्तीत्यभि – आरोहन्ति । यथा । खलु । वै ।

श्रेयान् । अभ्यारूढ इत्यभि – आरूढः । कामयते । तथा । करोति ।

यदि । अवविद्ध्यतीत्यव – विद्ध्यति । पापीयान् । भवति । यदि ।

न । अवविद्ध्यतीत्यव – विद्ध्यति । सदृङ्ङिति स – दृङ् । ये ।

एवम् । विद्वा॒ꣳसः । त्रयस्त्रि॒ꣳशदहमिति त्रयस्त्रिꣳशत् – अहम् ।
आसते । वीति । पाप्मना । भ्रातृव्येण । एति । वर्तन्ते ।
अहर्भाज इत्यहः – भाजः । वै । एताः । देवाः । अग्रे । एति ।
अहरन्न् । **18 (50)**

**<u>TS 7.4.5.2</u>**

–न्नहरेको ऽभजताह–रेक स्ताभिर्वैते प्रबाहुगार्द्ध्नुवन्. य एवं
ँविद्वाꣳस स्त्रयस्त्रिꣳशदहमासते सर्व एव प्रबाहुगृद्ध्नुवन्ति सर्वे
ग्रामणीयं प्राप्नुवन्ति पञ्चाहा भवन्ति पञ्च वा ऋतवः सꣳवथ्सर
ऋतुष्वेव सꣳवथ्सरे प्रति तिष्ठन्त्यथो पञ्चाक्षरा पङ्क्तिः पाङ्क्तो यज्ञो
यज्ञमेवाव रुन्धते त्रीण्याश्विनानि भवन्ति त्रय इमे लोका ए– [ ] **19**

**<u>TS 7.4.5.2 - Padam</u>**

अहः । एकः । अभजत । अहः । एकः । ताभिः । वै । ते ।
प्रबाहुगिति प्र – बाहुक् । आर्द्ध्नुवन्न् । ये । एवम् । विद्वाꣳसः ।
त्रयस्त्रिꣳशदहमिति त्रयस्त्रिꣳशत् – अहम् । आसते । सर्वे । एव ।

प्रबाहुगिति प्र – बाहुक् । ऋद्ध्नुवन्ति । सर्वे । ग्रामणीयमिति ग्राम – नीयम् । प्रेति । आप्नुवन्ति । पञ्चाहा इति पञ्च–अहाः । भवन्ति । पञ्च । वै । ऋतवः । सँवथ्सर इति सं – वथ्सरः । ऋतुषु । एव । सँवथ्सर इति सं–वथ्सरे । प्रतीति । तिष्ठन्ति । अथो इति । पञ्चाक्षरेति पञ्च–अक्षरा । पङ्क्तिः । पाङ्क्तः । यज्ञः । यज्ञम् । एव । अवेति । रुन्धते । त्रीणि । आश्विनानि । भवन्ति । त्रयः । इमे । लोकाः । एषु । **19 (50)**

**<u>TS 7.4.5.3</u>**

–ष्वेव लोकेषु प्रति तिष्ठन्त्यथो त्रीणि वै यज्ञस्येन्द्रियाणि तान्येवाव रुन्धते विश्वजिद्–भवत्यन्नाद्यस्यावरुद्ध्यै सर्वपृष्ठो भवति सर्वस्याभिजित्यै वाग्वै द्वादशाहो यत् पुरस्ताद् द्वादशाह–मुपेयुरनाप्ताँ वाच–मुपेयु–रुपदासुकैषाँ वाख् स्या–दुपरिष्टाद् द्वादशाहमुप यन्त्याप्तामेव वाचमुप यन्ति तस्मा–दुपरिष्टाद्–वाचा वदामो ऽवान्तरं – [ ] **20**

**TS 7.4.5.3 - Padam**

एव । लोकेषु । प्रतीति । तिष्ठन्ति । अथो इति । त्रीणि । वै ।
यज्ञस्य । इन्द्रियाणि । तानि । एव । अवेति । रुन्धते ।
विश्वजिदिति विश्व – जित् । भवति । अन्नाद्यस्येत्यन्न – अद्यस्य ।
अवरुद्ध्या इत्यव – रुद्ध्यै । सर्वपृष्ठ इति सर्व – पृष्ठः ।
भवति । सर्वस्य । अभिजित्या इत्यभि – जित्यै । वाक् । वै ।
द्वादशाह इति द्वादश – अहः । यत् । पुरस्तात् । द्वादशाहमिति
द्वादश – अहम् । उपेयुरित्युप–इयुः । अनाप्ताम् । वाचम् । उपेति ।
इयुः । उपदासुकेत्युप – दासुका । एषाम् । वाक् । स्यात् ।
उपरिष्टात् । द्वादशाहमिति द्वादश – अहम् । उपेति । यन्ति ।
आप्ताम् । एव । वाचम् । उपेति । यन्ति । तस्मात् । उपरिष्टात् ।
वाचा । वदामः । अवान्तरमित्यव – अन्तरम् । **20 (50)**

**TS 7.4.5.4**

वैँ दशरात्रेण प्रजापतिः प्रजा असृजत यद्–दशरात्रो भवति प्रजा
एव तद् यजमानाः सृजन्त एता८ ह वा उदङ्कः शौल्बायनः

सत्रस्यर्द्धिमुवाच यद् दशरात्रो यद् दशरात्रो भवति सत्रस्यर्द्ध्या
अथो यदेव पूर्वेष्वहस्सु विलोम क्रियते तस्यैवैषा शान्तिर्द्व्यनीका
वा एता रात्रयो यजमाना विश्वजिथ् सहातिरात्रेण पूर्वाः षोडश सहा–
( )–तिरात्रेणोत्तराः षोडश य एवं ँविद्वाꣳस स्त्रयस्त्रिꣳशदहमासत
ऐषां द्व्यनीका प्रजा जायते ऽतिरात्रावभितो भवतः परिगृहीत्यै ॥ **21**

**TS 7.4.5.4 - Padam**

वै । दशरात्रेणेति दश – रात्रेण । प्रजापतिरिति प्रजा – पतिः ।
प्रजा इति प्र – जाः । असृजत । यत् । दशरात्र इति दश – रात्रः ।
भवति । प्रजा इति प्र – जाः । एव । तत् । यजमानाः । सृजन्ते ।
एताम् । ह । वै । उदङ्कः । शौल्बायनः । सत्रस्य । ऋद्धिम् ।
उवाच । यत् । दशरात्र इति दश – रात्रः । यत् । दशरात्र इति
दश – रात्रः । भवति । सत्रस्य । ऋद्ध्यै । अथो इति । यत् । एव ।
पूर्वेषु । अहस्स्वित्यहः – सु । विलोमेति वि – लोम । क्रियते ।
तस्य । एव । एषा । शान्तिः । द्व्यनीका इति द्वि – अनीकाः । वै ।
एताः । रात्रयः । यजमानाः । विश्वजिदिति विश्व – जित् । सह ।

अतिरात्रेणेत्यति - रात्रेण । पूर्वाः । षोडश । सह ( ) ।

अतिरात्रेणेत्यति - रात्रेण । उत्तरा इत्युत् - तराः । षोडश । ये ।

एवम् । विद्वा॒ꣳसः । त्रयस्त्रि॒ꣳशदहमिति त्रयस्त्रि॒ꣳशत् - अहम् ।

आसते । एति । एषाम् । द्व्यनीकेति द्वि - अनीका ।

प्रजेति प्र - जा । जायते । अतिरात्रावित्यति - रात्रौ । अभितः ।

भवतः । परिगृहीत्या इति परि - गृहीत्यै ॥ **21 (67)**

*(अहर्- त्रेष्व - वान्तरꣳ - षोडश सह - सप्तदश च) (A5)*

**TS 7.4.6.1**

आदित्या अकामयन्त सुवर्गं ँलोकमियामेति ते सुवर्गं ँलोकं न प्राजानन्न सुवर्गं ँलोकमायन् त एतꣳ षट्त्रि॒ꣳशद्रात्र-मपश्यन् तमा ऽहरन् तेनायजन्त ततो वै ते सुवर्गं ँलोकं प्राजानन्थ् सुवर्गं ँलोकमायन्. य एवं ँविद्वा॒ꣳसः षट्त्रि॒ꣳशद्रात्र-मासते सुवर्गमेव लोकं प्र जानन्ति सुवर्गं ँलोकं ँयन्ति ज्योतिरतिरात्रो - [ ] **22**

**TS 7.4.6.1 - Padam**

आदित्याः । अकामयन्त । सुवर्गमिति सुवः – गम् । लोकम् ।

इयाम । इति । ते । सुवर्गमिति सुवः – गम् । लोकम् । न ।

प्रेति । अजानन्न् । न । सुवर्गमिति सुवः–गम् । लोकम् । आयन्न् ।

ते । एतम् । षट्त्रिꣳशद्रात्रमिति षट्त्रिꣳशत् – रात्रम् । अपश्यन्न् ।

तम् । एति । अहरन्न् । तेन । अयजन्त । ततः । वै । ते । सुवर्गमिति

सुवः – गम् । लोकम् । प्रेति । अजानन्न् । सुवर्गमिति सुवः–गम् ।

लोकम् । आयन्न् । ये । एवम् । विद्वाꣳसः ।

षट्त्रिꣳशद्रात्रमिति षट्त्रिꣳशत् – रात्रम् । आसते ।

सुवर्गमिति सुवः – गम् । एव । लोकम् । प्रेति । जानन्ति ।

सुवर्गमिति सुवः – गम् । लोकम् । यन्ति । ज्योतिः ।

अतिरात्र इत्यति – रात्रः । **22 (50)**

**TS 7.4.6.2**

भवति ज्योतिरेव पुरस्ताद् दधते सुवर्गस्य लोकस्यानुख्यात्यै षडहा

भवन्ति षड् वा ऋतव ऋतुष्वेव प्रति तिष्ठन्ति चत्वारो भवन्ति चतस्रो

दिशो दिक्ष्वेव प्रति तिष्ठन्त्यसत्रं ँवा एतद्–यदछन्दोमं ँयच्छन्दोमा

भवन्ति तेन सत्रं देवता एव पृष्ठैरव रुन्धते पशूञ्छन्दोमैरोजो वै वीर्यं पृष्ठानि पशवः छन्दोमा ओजस्येव – [ ] **23**

**TS 7.4.6.2 - Padam**

भवति । ज्योतिः । एव । पुरस्तात् । दधते । सुवर्गस्येति सुवः – गस्य । लोकस्य । अनुख्यात्या इत्यनु – ख्यात्यै । षडहा इति षट् – अहाः । भवन्ति । षट् । वै । ऋतवः । ऋतुषु । एव । प्रतीति । तिष्ठन्ति । चत्वारः । भवन्ति । चतस्रः । दिशः । दिक्षु । एव । प्रतीति । तिष्ठन्ति । असत्रम् । वै । एतत् । यत् । अछन्दोममित्यछन्दः – मम् । यत् । छन्दोमा इति छन्दः – माः । भवन्ति । तेन । सत्रम् । देवताः । एव । पृष्ठैः । अवेति । रुन्धते । पशून् । छन्दोमैरिति छन्दः – मैः । ओजः । वै । वीर्यम् । पृष्ठानि । पशवः । छन्दोमा इति छन्दः – माः । ओजसि । एव । **23 (50)**

**TS 7.4.6.3**

वीर्ये पशुषु प्रति तिष्ठन्ति षट्त्रिꣳशद्रात्रो भवति षट्त्रिꣳशदक्षरा बृहती बार्.हताः पशवो बृहत्यैव पशूनव रुन्धते बृहती छन्दसाꣳ

स्वाराज्यमाश्नुताश्नुवते स्वाराज्यं ँय एवं ँविद्वाꣳसः

षट्त्रिꣳशद्रात्र-मासते सुवर्गमेव लोकं ँयन्त्यतिरात्रावभितो भवतः

सुवर्गस्य लोकस्य परिगृहीत्यै ॥ **24**

**TS 7.4.6.3 - Padam**

वीर्ये । पशुषु । प्रतीति । तिष्ठन्ति । षट्त्रिꣳशद्रात्र इति

षट्त्रिꣳशत्-रात्रः । भवति । षट्त्रिꣳशदक्षरेति षट्त्रिꣳशत्-अक्षरा ।

बृहती । बार्.हताः । पशवः । बृहत्या । एव । पशून् । अवेति ।

रुन्धते । बृहती । छन्दसाम् । स्वाराज्यमिति स्व - राज्यम् ।

आश्नुत । अश्नुवते । स्वाराज्यमिति स्व - राज्यम् । ये । एवम् ।

विद्वाꣳसः । षट्त्रिꣳशद्रात्रमिति षट्त्रिꣳशत् - रात्रम् । आसते ।

सुवर्गमिति सुवः - गम् । एव । लोकम् । यन्ति ।

अतिरात्रावित्यति - रात्रौ । अभितः । भवतः ।

सुवर्गस्येति सुवः - गस्य । लोकस्य ।

परिगृहीत्या इति परि - गृहीत्यै ॥ **24 (36)**

*(अतिरात्र - ओजस्येव - षट्त्रिꣳशच्च) (A6)*

**TS 7.4.7.1**

वसिष्ठो हतपुत्रो ऽकामयत विन्देय प्रजामभि सौदासान् भवेयमिति

स एतमेकस्मान्नपञ्चाश–मपश्यत् तमा ऽहरत् तेनायजत ततो वै

सो ऽविन्दत प्रजामभि सौदासानभवद्–य एवं ँविद्वा॒ꣳस

एकस्मान्नपञ्चाश–मासते विन्दन्ते प्रजामभि भ्रातृव्यान् भवन्ति

त्रयस्त्रिवृतोऽग्निष्टोमा भवन्ति वज्रस्यैव मुखꣳ सꣳ श्यन्ति

दश पञ्चदशा भवन्ति पञ्चदशो वज्रो – [ ] **25**

**TS 7.4.7.1 - Padam**

वसिष्ठः । हतपुत्र इति हत – पुत्रः । अकामयत । विन्देय ।

प्रजामिति प्र–जाम् । अभीति । सौदासान् । भवेयम् । इति । सः ।

एतम् । एकस्मान्नपञ्चाशमित्येकस्मात् – नपञ्चाशम् । अपश्यत् ।

तम् । एति । अहरत् । तेन । अयजत । ततः । वै । सः । अविन्दत ।

प्रजामिति प्र–जाम् । अभीति । सौदासान् । अभवत् । ये । एवम् ।

विद्वाꣳसः । एकस्मान्नपञ्चाशमित्येकस्मात्–नपञ्चाशम् । आसते ।

विन्दन्ते । प्रजामिति प्र – जाम् । अभीति । भ्रातृव्यान् । भवन्ति ।

त्रयः । त्रिवृत इति त्रि - वृतः । अग्निष्टोमा इत्यग्नि - स्तोमाः ।

भवन्ति । वज्रस्य । एव । मुखम् । समिति । श्यन्ति । दश ।

पञ्चदशा इति पञ्च - दशाः । भवन्ति ।

पञ्चदश इति पञ्च - दशः । वज्रः । **25 (50)**

**TS 7.4.7.2**

वज्रमेव भ्रातृव्येभ्यः प्र हरन्ति षोडशिमद्-दशममह-र्भवति

वज्र एव वीर्यं दधति द्वादश सप्तदशा भवन्त्यन्नाद्यस्यावरुद्ध्या

अथो प्रैव तैर्जायन्ते पृष्ठ्यः षडहो भवति षड्वा ऋतवः षट् पृष्ठानि

पृष्ठैरेवर्तूनन्वारोहन्त्यृतृभिः सँवथ्सरं ते सँवथ्सर एव प्रति तिष्ठन्ति

द्वादशैकवि॒ँशा भवन्ति प्रतिष्ठित्या अथो रुचमेवाऽऽत्मन्- [ ] **26**

**TS 7.4.7.2 - Padam**

वज्रम् । एव । भ्रातृव्येभ्यः । प्रेति । हरन्ति । षोडशिमदिति

षोडशि - मत् । दशमम् । अहः । भवति । वज्रे । एव । वीर्यम् ।

दधति । द्वादश । सप्तदशा इति सप्त - दशाः । भवन्ति ।

अन्नाद्यस्येत्यन्न- अद्यस्य । अवरुद्ध्या इत्यव-रुद्ध्यै । अथो इति ।

प्रेति । एव । तैः । जायन्ते । पृष्ठ्यः । षडह इति षट् - अहः ।

भवति । षट् । वै । ऋतवः । षट् । पृष्ठानि । पृष्ठैः । एव । ऋतून् ।
अन्वारोहन्तीत्यनु-आरोहन्ति । ऋतुभिरित्यृतु - भिः । सँवथ्सरमिति
सं - वथ्सरम् । ते । सँवथ्सर इति सं - वथ्सरे । एव । प्रतीति ।
तिष्ठन्ति । द्वादश । एकवि॒ꣳशा इत्येक - वि॒ꣳशाः । भवन्ति ।
प्रतिष्ठित्या इति प्रति - स्थित्यै । अथो इति । रुचम् । एव ।
आत्मन्न् । **26 (50)**

**TS 7.4.7.3**

दधते बहवः षोडशिनो भवन्ति विजित्यै षडाश्विनानि भवन्ति षड् वा
ऋतव ऋतुष्वेव प्रति तिष्ठन्त्यूनातिरिक्ता वा एता रात्रय ऊनास्तद्-
यदेकस्यै न पञ्चाशद-तिरिक्तास्तद्-यद्-भूयसी-रष्टाचत्वारि॒ꣳशत
ऊनाच्च खलु वा अतिरिक्ताच्च प्रजापतिः प्राजायत ये प्रजाकामाः
पशुकामाः स्युस्त एता आसीरन् प्रैव जायन्ते प्रजया ( )
पशुभिर्वैराजो वा एष यज्ञो यदेकस्मान्नपञ्चाशो य एवं ँविद्वा॒ꣳस
एकस्मान्नपञ्चाश-मासते विराजमेव गच्छन्त्यन्नादा
भवन्त्यतिरात्राविभितो भवतो ऽन्नाद्यस्य परिगृहीत्यै ॥ **27**

**TS 7.4.7.3 - Padam**

दधते । बहवः । षोडशिनः । भवन्ति । विजित्या इति वि - जित्यै ।
षट् । आश्विनानि । भवन्ति । षट् । वै । ऋतवः । ऋतुषु । एव ।
प्रतीति । तिष्ठन्ति । ऊनातिरिक्ता इत्यून - अतिरिक्ताः । वै । एताः ।
रात्रयः । ऊनाः । तत् । यत् । एकस्यै । न । पञ्चाशत् ।
अतिरिक्ता इत्यति - रिक्ताः । तत् । यत् । भूयसीः ।
अष्टाचत्वारिꣳशत इत्यष्टा-चत्वारिꣳशतः । ऊनात् । च । खलु । वै ।
अतिरिक्तादित्यति-रिक्तात् । च । प्रजापतिरिति प्रजा - पतिः । प्रेति ।
अजायत । ये । प्रजाकामा इति प्रजा - कामाः । पशुकामा इति
पशु - कामाः । स्युः । ते । एताः । आसीरन्न् । प्रेति । एव ।
जायन्ते । प्रजयेति प्र - जया ( ) । पशुभिरिति पशु - भिः ।
वैराजः । वै । एषः । यज्ञः । यत् । एकस्मान्नपञ्चाश
इत्येकस्मात् - नपञ्चाशः । ये । एवम् । विद्वाꣳसः ।
एकस्मान्नपञ्चाशमित्येकस्मात् - नपञ्चाशम् । आसते ।
विराजमिति वि - राजम् । एव । गच्छन्ति । अन्नादा इत्यन्न-अदाः ।

भवन्ति । अतिरात्रावित्यति – रात्रौ । अभितः । भवतः ।
अन्नाद्यस्येत्यन्न–अद्यस्य । परिगृहीत्या इति परि–गृहीत्यै ॥ **27 (72)**

*(वज्र – आत्मन् – प्रजया – द्वाविꣳशतिश्च) (A7)*

**TS 7.4.8.1**

सꣳवथ्सराय दीक्षिष्यमाणा एकाष्टकायां दीक्षेरन्नेषा वै सꣳवथ्सरस्य पत्नी यदेकाष्टकैतस्यां ꣳवा एष एताꣳ रात्रिं ꣳवसति साक्षादेव सꣳवथ्सरमारभ्य दीक्षन्त आर्तं ꣳवा एते सꣳवथ्सरस्याभि दीक्षन्ते य एकाष्टकायां दीक्षन्ते ऽन्तनामानावृतू भवतो व्यस्तं ꣳवा एते सꣳवथ्सरस्याऽभि दीक्षन्ते य एकाष्टकायां दीक्षन्ते ऽन्तनामानावृतू भवतः फल्गुनीपूर्णमासे दीक्षेरन् मुखं ꣳवा एतथ् – [ ] **28**

**TS 7.4.8.1 - Padam**

सꣳवथ्सरायेति सं – वथ्सराय । दीक्षिष्यमाणाः ।
एकाष्टकायामित्येक – अष्टकायाम् । दीक्षेरन्न् । एषा । वै ।
सꣳवथ्सरस्येति सं – वथ्सरस्य । पत्नी । यत् ।
एकाष्टकेत्येक–अष्टका । एतस्याम् । वै । एषः । एताम् । रात्रिम् ।

वसति । साक्षादिति स - अक्षात् । एव । सँवथ्सरमिति

सं - वथ्सरम् । आरभ्येत्या - रभ्य । दीक्षन्ते । आर्तम् । वै । एते ।

सँवथ्सरस्येति सं - वथ्सरस्य । अभीति । दीक्षन्ते । ये ।

एकाष्टकायामित्येक - अष्टकायाम् । दीक्षन्ते ।

अन्तनामानावित्यन्त- नामानौ । ऋतू इति । भवतः । व्यस्तमिति

वि-अस्तम् । वै । एते । सँवथ्सरस्येति सं - वथ्सरस्य । अभीति ।

दीक्षन्ते । ये । एकाष्टकायामित्येक - अष्टकायाम् । दीक्षन्ते ।

अन्तनामानावित्यन्त- नामानौ । ऋतू इति । भवतः ।

फल्गुनीपूर्णमास इति फल्गुनी- पूर्णमासे । दीक्षेरन्न् । मुखम् । वै ।

एतत् । **28 (50)**

**TS 7.4.8.2**

सँवथ्सरस्य यत् फल्गुनीपूर्णमासो मुखत एव सँवथ्सरमारभ्य

दीक्षन्ते तस्यैकैव निर्या यथ् साम्मेघ्ये विषूवान्थ् संपद्यते

चित्रापूर्णमासे दीक्षेरन् मुखं ँवा एतथ् सँवथ्सरस्य यच्चित्रापूर्णमासो

मुखत एव सँवथ्सरमारभ्य दीक्षन्ते तस्य न का चन निर्या भवति

चतुरहे पुरस्तात् पौर्णमास्यै दीक्षेरन् तेषामेकाष्टकायां क्रयः सं पद्यते तेनैकाष्टकां न छम्बट् कुर्वन्ति तेषां - [ ] 29

**TS 7.4.8.2 - Padam**

सँवथ्सरस्येति सं - वथ्सरस्य । यत् । फल्गुनीपूर्णमास इति फल्गुनी-पूर्णमासः । मुखतः । एव । सँवथ्सरमिति सं-वथ्सरम् । आरभ्येत्या - रभ्य । दीक्षन्ते । तस्य । एका । एव । निर्येति निः - या । यत् । साम्मेघ्य इति सां - मेघ्ये । विषूवानिति विषु - वान् । संपद्यत इति सं - पद्यते । चित्रापूर्णमास इति चित्रा - पूर्णमासे । दीक्षेरन्न् । मुखम् । वै । एतत् । सँवथ्सरस्येति सं - वथ्सरस्य । यत् । चित्रापूर्णमास इति चित्रा - पूर्णमासः । मुखतः । एव । सँवथ्सरमिति सं - वथ्सरम् । आरभ्येत्या - रभ्य । दीक्षन्ते । तस्य । न । का । चन । निर्येति निः - या । भवति । चतुरह इति चतुः-अहे । पुरस्तात् । पौर्णमास्या इति पौर्ण-मास्यै । दीक्षेरन्न् । तेषाम् । एकाष्टकायामित्येक - अष्टकायाम् । क्रयः ।

समिति । पद्यते । तेन । एकाष्टकामित्येक-अष्टकाम् । न । छम्बट् । कुर्वन्ति । तेषाम् । **29 (50)**

**TS 7.4.8.3**

पूर्वपक्षे सुत्या सं पद्यते पूर्वपक्षं मासा अभि सं पद्यन्ते ते पूर्वपक्ष उत् तिष्ठन्ति तानुत्तिष्ठत ओषधयो वनस्पतयोऽनूत् तिष्ठन्ति तान् कल्याणी कीर्तिरनूत् तिष्ठत्यराथ्सु-रिमे यजमाना इति तदनु सर्वे राद्ध्नुवन्ति ॥ **30**

**TS 7.4.8.3 - Padam**

पूर्वपक्ष इति पूर्व - पक्षे । सुत्या । समिति । पद्यते । पूर्वपक्षमिति पूर्व - पक्षम् । मासाः । अभि । समिति । पद्यन्ते । ते । पूर्वपक्ष इति पूर्व-पक्षे । उदिति । तिष्ठन्ति । तान् । उत्तिष्ठत इत्युत्-तिष्ठतः । ओषधयः । वनस्पतयः । अनु । उदिति । तिष्ठन्ति । तान् । कल्याणी । कीर्तिः । अनु । उदिति । तिष्ठति । अराथ्सुः । इमे । यजमानाः । इति । तत् । अन्विति । सर्वे । राद्ध्नुवन्ति ॥ **30 (34)**

*(एत - च्छंबट्कुर्वन्ति तेषां - चतुस्त्रिꣳशच्च) (A8)*

**TS 7.4.9.1**

सुवर्गं वा एते लोकं यन्ति ये सत्रमुपयन्त्यभीन्धत एव

दीक्षाभिरात्मान श्रपयन्त उपसद्भि-र्द्वाभ्यां लोमाव द्यन्ति

द्वाभ्यां त्वचं द्वाभ्यामसृद् द्वाभ्यां मा॑ंसं द्वाभ्यामस्थि द्वाभ्यां

मज्जानमात्मदक्षिणं वै सत्रमात्मानमेव दक्षिणां नीत्वा सुवर्गं

लोकं यन्ति शिखामनु प्र वपन्त ऋद्ध्या अथो रघीया॑ंसः

सुवर्गं लोकमयामेति ( ) ॥ **31**

**TS 7.4.9.1 - Padam**

सुवर्गमिति सुवः – गम् । वै । एते । लोकम् । यन्ति । ये । सत्रम् ।

उपयन्तीत्युप – यन्ति । अभीति । इन्धते । एव । दीक्षाभिः ।

आत्मानम् । श्रपयन्ते । उपसद्भिरित्युपसत् – भिः । द्वाभ्याम् ।

लोम । अवेति । द्यन्ति । द्वाभ्याम् । त्वचम् । द्वाभ्याम् । असृत् ।

द्वाभ्याम् । मा॑ंसम् । द्वाभ्याम् । अस्थि । द्वाभ्याम् । मज्जानम् ।

आत्मदक्षिणमित्यात्म – दक्षिणम् । वै । सत्रम् । आत्मानम् । एव ।

दक्षिणाम् । नीत्वा । सुवर्गमिति सुवः – गम् । लोकम् । यन्ति ।

शिखाम् । अनु । प्रेति । वपन्ते । ऋद्ध्यै । अथो इति ।

रघीयाꣳसः । सुवर्गमिति सुवः - गम् । लोकम् । अयाम ।

इति ( ) ॥ **31 (50)** *(सुवर्गं - पञ्चाशत्) (A9)*

**TS 7.4.10.1**

ब्रह्मवादिनो वदन्त्यतिरात्रः परमो यज्ञक्रतूनां कस्मात् तं प्रथममुप यन्तीत्येतद्-वा अग्निष्टोमं प्रथममुप यन्त्यथोक्थ्यमथ षोडशिन-मथातिरात्र-मनुपूर्वमेवैतद्-यज्ञक्रतूनुपेत्य तानालभ्य परिगृह्य सोममेवैतत् पिबन्त आसते ज्योतिष्टोमं प्रथममुप यन्ति ज्योतिष्टोमो वै स्तोमानां मुखं मुखत एव स्तोमान् प्र युञ्जते ते - [ ] **32**

**TS 7.4.10.1 - Padam**

ब्रह्मवादिन इति ब्रह्म - वादिनः । वदन्ति । अतिरात्र इत्यति-रात्रः ।

परमः । यज्ञक्रतूनामिति यज्ञ-क्रतूनाम् । कस्मात् । तम् । प्रथमम् ।

उपेति । यन्ति । इति । एतत् । वै । अग्निष्टोममित्यग्नि - स्तोमम् ।

प्रथमम् । उपेति । यन्ति । अथ । उक्थ्यम् । अथ । षोडशिनम् ।

अथ । अतिरात्रमित्यति - रात्रम् । अनुपूर्वमित्यनु - पूर्वम् । एव ।

एतत् । यज्ञक्रतूनिति यज्ञ - क्रतून् । उपेत्येत्युप - इत्य । तान् ।

आलभ्येत्या – लभ्य । परिगृह्येति परि – गृह्य । सोमम् । एव ।
एतत् । पिबन्तः । आसते । ज्योतिष्टोममिति ज्योतिः – स्तोमम् ।
प्रथमम् । उपेति । यन्ति । ज्योतिष्टोम इति ज्योतिः – स्तोमः । वै ।
स्तोमानाम् । मुखम् । मुखतः । एव । स्तोमान् । प्रेति ।
युञ्जते । ते । **32 (50)**

**TS 7.4.10.2**

सꣳस्तुता विराजमभि सं पद्यन्ते द्वे चर्चावति रिच्येते एकया
गौरतिरिक्त एकया ऽऽयुरूनः सुवर्गो वै लोको ज्योतिरूर्ग्–विराट्–
थ्सुवर्गमेव तेन लोकं यँन्ति रथन्तरं दिवा भवति रथन्तरं
नक्तमित्याहु–र्ब्रह्मवादिनः केन तदजामीति सौभरं तृतीयसवने
ब्रह्मसामं बृहत् तन्मद्ध्यतो दधति विधृत्यै तेनाजामि ॥ **33**

**TS 7.4.10.2 - Padam**

सꣳस्तुता इति सं – स्तुताः । विराजमिति वि – राजम् । अभि ।
समिति । पद्यन्ते । द्वे इति । च । ऋचौ । अतीति । रिच्येते इति ।
एकया । गौः । अतिरिक्त इत्यति – रिक्तः । एकया । आयुः । ऊनः ।

सुवर्ग इति सुवः - गः । वै । लोकः । ज्योतिः । ऊर्क् । विराडिति वि - राट् । सुवर्गमिति सुवः-गम् । एव । तेन । लोकम् । यन्ति । रथन्तरमिति रथं - तरम् । दिवा । भवति । रथन्तरमिति रथं-तरम् । नक्तम् । इति । आहुः । ब्रह्मवादिन इति ब्रह्म-वादिनः । केन । तत् । अजामि । इति । सौभरम् । तृतीयसवन इति तृतीय - सवने । ब्रह्मसाममिति ब्रह्म - सामम् । बृहत् । तत् । मद्ध्यतः । दधति । विधृत्या इति वि - धृत्यै । तेन । अजामि ॥ **33 (49)**

*(त - एकान्नपञ्चाशच्च) (A10)*

**TS 7.4.11.1**

ज्योतिष्टोमं प्रथममुप यन्त्यस्मिन्नेव तेन लोके प्रति तिष्ठन्ति गोष्टोमं द्वितीयमुप यन्त्यन्तरिक्ष एव तेन प्रति तिष्ठन्त्यायुष्टोमं तृतीयमुप यन्त्यमुष्मिन्नेव तेन लोके प्रति तिष्ठन्तीयंँवाव ज्योतिरन्तरिक्षं गौरसावायु-र्यदेतान्थ्-स्तोमा-नुपयन्त्येष्वेव तल्लोकेषु सत्रिणः प्रतितिष्ठन्तो यन्ति ते सꣳस्तुता विराज - [ ] **34**

**TS 7.4.11.1 - Padam**

ज्योतिष्टोममिति ज्योतिः – स्तोमम् । प्रथमम् । उपेति । यन्ति ।

अस्मिन्न् । एव । तेन । लोके । प्रतीति । तिष्ठन्ति ।

गोष्टोममिति गो – स्तोमम् । द्वितीयम् । उपेति । यन्ति । अन्तरिक्षे ।

एव । तेन । प्रतीति । तिष्ठन्ति । आयुष्टोममित्यायुः – स्तोमम् ।

तृतीयम् । उपेति । यन्ति । अमुष्मिन्न् । एव । तेन । लोके । प्रतीति ।

तिष्ठन्ति । इयम् । वाव । ज्योतिः । अन्तरिक्षम् । गौः । असौ ।

आयुः । यत् । एतान् । स्तोमान् । उपयन्तीत्युप – यन्ति । एषु ।

एव । तत् । लोकेषु । सत्रिणः । प्रतितिष्ठन्त इति प्रति – तिष्ठन्तः ।

यन्ति । ते । स॒ꣳस्तुता इति सं – स्तुताः ।

विराजमिति वि – राजम् । **34 (50)**

**TS 7.4.11.2**

–मभि सं पद्यन्ते द्वे चर्चावति रिच्येते एकया गौरतिरिक्त

एकया ऽऽयुरूनः सुवर्गो वै लोको ज्योतिरूर्ग्–विराडूर्ज–मेवाव

रुन्धते ते न क्षुधा ऽऽर्तिमार्च्छन्त्यक्षोधुका भवन्ति क्षुथ्संबाधा इव हि

सत्रिणो ऽग्निष्टोमावभितः प्रधी तावुक्थ्या मद्ध्ये नभ्यं तत् तदेतत्
परियद्-देवचक्रं ँयदेतेन - [ ] **35**

**TS 7.4.11.2 - Padam**

अभि । समिति । पद्यन्ते । द्वे इति । च । ऋचौ । अतीति । रिच्येते
इति । एकया । गौः । अतिरिक्त इत्यति - रिक्तः । एकया । आयुः ।
ऊनः । सुवर्ग इति सुवः - गः । वै । लोकः । ज्योतिः । ऊर्क् ।
विराडिति वि - राट् । ऊर्जम् । एव । अवेति । रुन्धते । ते । न ।
क्षुधा । आर्तिम् । एति । ऋच्छन्ति । अक्षोधुकाः । भवन्ति ।
क्षुथ्सम्बाधा इति क्षुत् - सम्बाधाः । इव । हि । सत्रिणः ।
अग्निष्टोमावित्यग्नि - स्तोमौ । अभितः । प्रधी इति प्र -धी । तौ ।
उक्थ्याः । मद्ध्ये । नभ्यम् । तत् । तत् । एतत् । परियदिति
परि - यत् । देवचक्रमिति देव - चक्रम् । यत् । एतेन । **35 (50)**

**TS 7.4.11.3**

षडहेन यन्ति देवचक्रमेव समारोहन्त्यरिष्ट्यै ते स्वस्ति समश्नुवते
षडहेन यन्ति षड्वा ऋतव ऋतुष्वेव प्रति तिष्ठन्त्युभयतोज्योतिषा
यन्त्युभयत एव सुवर्गे लोके प्रतितिष्ठन्तो यन्ति द्वौ षडहौ भवतस्तानि

द्वादशाहानि सं पद्यन्ते द्वादशो वै पुरुषो द्वे सक्थ्यौ द्वौ बाहू आत्मा च शिरश्च चत्वार्यङ्गानि स्तनौ द्वादशौ – [ ] **36**

**TS 7.4.11.3 - Padam**

षडहेनेति षट् – अहेन । यन्ति । देवचक्रमिति देव–चक्रम् । एव । समारोहन्तीति सं – आरोहन्ति । अरिष्ट्यै । ते । स्वस्ति । समिति । अश्ञुवते । षडहेनेति षट् – अहेन । यन्ति । षट् । वै । ऋतवः । ऋतुषु । एव । प्रतीति । तिष्ठन्ति । उभयतोज्योतिषेत्युभयतः–ज्योतिषा । यन्ति । उभयतः । एव । सुवर्ग इति सुवः – गे । लोके । प्रतितिष्ठन्त इति प्रति–तिष्ठन्तः । यन्ति । द्वौ । षडहाविति षट्–अहौ । भवतः । तानि । द्वादश । अहानि । समिति । पद्यन्ते । द्वादशः । वै । पुरुषः । द्वे इति । सक्थ्यौ । द्वौ । बाहू इति । आत्मा । च । शिरः । च । चत्वारि । अङ्गानि । स्तनौ । द्वादशौ । **36 (50)**

**TS 7.4.11.4**

तत् पुरुषमनु पर्यावर्तन्ते त्रयः षडहा भवन्ति तान्यष्टादशाहानि सं पद्यन्ते नवान्यानि नवान्यानि नव वै पुरुषे प्राणास्तत् प्राणाननु पर्यावर्तन्ते चत्वारः षडहा भवन्ति तानि चतुर्वि॑ꣳशतिरहानि सं पद्यन्ते चतुर्वि॑ꣳशतिरर्द्धमासाः सँवथ्सरस्तथ् सँवथ्सरमनु पर्यावर्तन्ते ऽप्रतिष्ठितः सँवथ्सर इति खलु वा आहुर्वर्.षीयान् प्रतिष्ठाया इत्येतावद्-वै ( ) सँवथ्सरस्य ब्राह्मणं ँयावन्मासो मासिमास्येव प्रतितिष्ठन्तो यन्ति ॥ **37**

**TS 7.4.11.4 - Padam**

तत् । पुरुषम् । अन्विति । पर्यावर्तन्त इति परि - आवर्तन्ते । त्रयः । षडहा इति षट् - अहाः । भवन्ति । तानि । अष्टादशेत्यष्टा - दश । अहानि । समिति । पद्यन्ते । नव । अन्यानि । नव । अन्यानि । नव । वै । पुरुषे । प्राणा इति प्र - अनाः । तत् । प्राणानिति प्र-अनान् । अन्विति । पर्यावर्तन्त इति परि - आवर्तन्ते । चत्वारः । षडहा इति षट्-अहाः । भवन्ति । तानि । चतुर्वि॑ꣳशतिरिति चतुः-वि॑ꣳशतिः । अहानि । समिति । पद्यन्ते । चतुर्वि॑ꣳशतिरिति चतुः - वि॑ꣳशतिः ।

अर्द्धमासा इत्यर्द्ध - मासाः । सँवथ्सर इति सं - वथ्सरः । तत् । सँवथ्सरमिति सं - वथ्सरम् । अन्विति । पर्यावर्तन्त इति परि - आवर्तन्ते । अप्रतिष्ठित इत्यप्रति - स्थितः । सँवथ्सर इति सं - वथ्सरः । इति । खलु । वै । आहुः । वर्.षीयान् । प्रतिष्ठाया इति प्रति - स्थायाः । इति । एतावत् । वै ( ) । सँवथ्सरस्येति सं - वथ्सरस्य । ब्राह्मणम् । यावत् । मासः । मासिमासीति मासि - मासि । एव । प्रतितिष्ठन्त इति प्रति - तिष्ठन्तः । यन्ति ॥ **37 (58)**

*(विराज - मेतेन - द्वादशा - वेतावद्वा - अष्टौ च) (A11)*

**TS 7.4.12.1**

मेषस्त्वा पचतैरवतु लोहितग्रीवः छागैः शल्मलिर्वृद्ध्या पर्णो ब्रह्मणा प्लक्षो मेधेन न्यग्रोधश्चमसैरुदुंबर ऊर्जा गायत्री छन्दोभिस्त्रिवृथ् स्तोमैरवन्तीः स्थावन्ती स्त्वा ऽवन्तु प्रियं त्वा प्रियाणां वँर्.षिष्ठमाप्यानां निधीनां त्वा निधिपतिं हवामहे वसो मम ॥ **38**

**TS 7.4.12.1 - Padam**

मेषः । त्वा । पचतैः । अवतु । लोहितग्रीव इति लोहित – ग्रीवः ।
छागैः । शल्मलिः । वृद्ध्या । पर्णः । ब्रह्मणा । प्लक्षः । मेधेन ।
न्यग्रोधः । चमसैः । उदुम्बरः । ऊर्जा । गायत्री । छन्दोभिरिति
छन्दः – भिः । त्रिवृदिति त्रि – वृत् । स्तोमैः । अवन्तीः । स्थ ।
अवन्तीः । त्वा । अवन्तु । प्रियम् । त्वा । प्रियाणाम् । वर्.षिष्ठम् ।
आप्यानाम् । निधीनामिति नि – धीनाम् । त्वा । निधिपतिमिति
निधि – पतिम् । हवामहे । वसो इति । मम ॥ **38 (36)**

*(मेषः – षट्त्रिꣳशत्) (A12)*

**TS 7.4.13.1**

कूप्याभ्यः स्वाहा कूल्याभ्यः स्वाहा विकर्याभ्यः स्वाहाऽवट्याभ्यः
स्वाहा खन्याभ्यः स्वाहा ह्रद्याभ्यः स्वाहा सूद्याभ्यः स्वाहा
सरस्याभ्यः स्वाहा वैशन्तीभ्यः स्वाहा पल्वल्याभ्यः स्वाहा
वर्ष्याभ्यः स्वाहाऽवर्ष्याभ्यः स्वाहा ह्रादुनीभ्यः स्वाहा पृष्वाभ्यः
स्वाहा स्यन्दमानाभ्यः स्वाहा स्थावराभ्यः स्वाहा नादेयीभ्यः स्वाहा
सैन्धवीभ्यः स्वाहा समुद्रियाभ्यः स्वाहा सर्वाभ्यः स्वाहा ॥ **39**

**TS 7.4.13.1 - Padam**

कूप्याभ्यः । स्वाहा । कूल्याभ्यः । स्वाहा । विकर्याभ्य इति

वि – कर्याभ्यः । स्वाहा । अवट्याभ्यः । स्वाहा । खन्याभ्यः ।

स्वाहा । ह्रद्याभ्यः । स्वाहा । सूद्याभ्यः । स्वाहा । सरस्याभ्यः ।

स्वाहा । वैशन्तीभ्यः । स्वाहा । पल्वल्याभ्यः । स्वाहा ।

वर्ष्याभ्यः । स्वाहा । अवर्ष्याभ्यः । स्वाहा । ह्रादुनीभ्य इति

ह्रादुनि – भ्यः । स्वाहा । पृष्वाभ्यः । स्वाहा । स्यन्दमानाभ्यः ।

स्वाहा । स्थावराभ्यः । स्वाहा । नादेयीभ्यः । स्वाहा । सैन्धवीभ्यः ।

स्वाहा । समुद्रियाभ्यः । स्वाहा । सर्वाभ्यः । स्वाहा ॥ **39 (40)**

*(कूप्याभ्य – श्चत्वारिꣳशत्) (A13)*

**TS 7.4.14.1**

अद्भ्यः स्वाहा वहन्तीभ्यः स्वाहा परिवहन्तीभ्यः स्वाहा समन्तं

ँवहन्तीभ्यः स्वाहा शीघ्रं ँवहन्तीभ्यः स्वाहा शीभं ँवहन्तीभ्यः

स्वाहोग्रं ँवहन्तीभ्यः स्वाहा भीमं ँवहन्तीभ्यः स्वाहाऽम्भोभ्यः स्वाहा

नभोभ्यः स्वाहा महोभ्यः स्वाहा सर्वस्मै स्वाहा ॥ **40**

**TS 7.4.14.1 - Padam**

अद्भ्य इत्यत् – भ्यः । स्वाहा । वहन्तीभ्यः । स्वाहा ।
परिवहन्तीभ्य इति परि – वहन्तीभ्यः । स्वाहा । समन्तमिति
सं–अन्तम् । वहन्तीभ्यः । स्वाहा । शीघ्रम् । वहन्तीभ्यः । स्वाहा ।
शीभम् । वहन्तीभ्यः । स्वाहा । उग्रम् । वहन्तीभ्यः । स्वाहा ।
भीमम् । वहन्तीभ्यः । स्वाहा । अम्भोभ्य इत्यम्भः–भ्यः । स्वाहा ।
नभोभ्य इति नभः – भ्यः । स्वाहा । महोभ्य इति महः – भ्यः ।
स्वाहा । सर्वस्मै । स्वाहा ॥ **40 (29)** ***(अद्भ्य–एकान्नत्रि॒ꣳशत्) (A14)***

**TS 7.4.15.1**

यो अर्वन्तं जिघाꣳसति तमभ्यमीति वरुणः ॥
परो मर्तः परः श्वा ॥
अहं च त्वं च वृत्रहन्थ् सं बभूव सनिभ्य आ ।
अरातीवा चिदद्रिवो ऽनु नौ शूर मꣳसतै भद्रा इन्द्रस्य रातयः ॥
अभि क्रत्वेन्द्र भू–रध ज्मन्न ते विव्यङ् महिमानꣳ रजाꣳसि ।
स्वेना हि वृत्रꣳ शवसा जघन्थ न शत्रुरन्तं॑ विविदद् ( )
युधा ते ॥ **41**

**TS 7.4.15.1 - Padam**

यः । अर्वन्तम् । जिघाꣳसति । तम् । अभीति । अमीति । वरुणः ॥
परः । मर्तः । परः । श्वा ॥ अहम् । च । त्वम् । च । वृत्रहन्निति
वृत्र – हन्न् । समिति । बभूव । सनिभ्य इति सनि – भ्यः । आ ॥
अरातीवा । चित् । अद्रिव इत्यद्रि – वः । अन्विति । नौ । शूर ।
मꣳसतै । भद्राः । इन्द्रस्य । रातयः ॥ अभीति । क्रत्वा । इन्द्र ।
भूः । अध । ज्मन्न् । न । ते । विव्यक् । महिमानम् । रजाꣳसि ॥
स्वेन । हि । वृत्रम् । शवसा । जघन्थ । न । शत्रुः । अन्तम् ।
विविदत् ( ) । युधा । ते ॥ **41 (52)**

*(विविदद् – द्वे च) (A15)*

**TS 7.4.16.1**

नमो राज्ञे नमो वरुणाय नमो ऽश्वाय नमः प्रजापतये नमो ऽधिपतये
ऽधिपतिरस्यधिपतिं मा कुर्वधिपतिरहं प्रजानां भूयासं मां धेहि मयि
धेह्युपाकृताय स्वाहा ऽऽलब्धाय स्वाहा हुताय स्वाहा ॥ **42**

**TS 7.4.16.1 - Padam**

नमः । राज्ञे । नमः । वरुणाय । नमः । अश्वाय । नमः । प्रजापतय

इति प्रजा – पतये । नमः । अधिपतय इत्यधि – पतये ।

अधिपतिरित्यधि – पतिः । असि । अधिपतिमित्यधि – पतिम् ।

मा । कुरु । अधिपतिरित्यधि – पतिः । अहम् । प्रजानामिति

प्र – जानाम् । भूयासम् । माम् । धेहि । मयि । धेहि ।

उपाकृतायेत्युप – आकृताय । स्वाहा । आलब्धायेत्या – लब्धाय ।

स्वाहा । हुताय । स्वाहा ॥ **42 (29)**

*(नम – एकान्नत्रि॒ꣳशत्) (A16)*

**TS 7.4.17.1**

मयोभूर्वातो अभि वातूस्रा ऊर्जस्वती–रोषधीरा रिशन्तां ।

पीवस्वतीर्जीवधन्याः पिबन्त्ववसाय पद्वते रुद्र मृड ॥

याः सरूपा विरूपा एकरूपा यासामग्निरिष्ट्या नामानि वेद ।

या अङ्गिरसस्तपसेह चक्रुस्ताभ्यः पर्जन्य महि शर्म यच्छ ॥

या देवेषु तनुव–मैरयन्त यासाꣳ सोमो विश्वा रूपाणि वेद ।

ता अस्मभ्यं पयसा पिन्वमानाः प्रजावतीरिन्द्र – [ ] **43**

**TS 7.4.17.1 - Padam**

मयोभूरिति मयः – भूः । वातः । अभीति । वातु । उस्राः ।

ऊर्जस्वतीः । ओषधीः । एति । रिशन्ताम् ॥ पीवस्वतीः । जीवधन्या

इति जीव – धन्याः । पिबन्तु । अवसाय । पद्वत इति पत् – वते ।

रुद्र । मृड ॥ याः । सरूपा इति स – रूपाः । विरूपा इति

वि – रूपाः । एकरूपा इत्येक–रूपाः । यासाम् । अग्निः । इष्ट्या ।

नामानि । वेद ॥ याः । अङ्गिरसः । तपसा । इह । चक्रुः । ताभ्यः ।

पर्जन्य । महि । शर्म । यच्छ ॥ याः । देवेषु । तनुवम् ।

ऐरयन्त । यासाम् । सोमः । विश्वा । रूपाणि । वेद ॥ ताः ।

अस्मभ्यमित्यस्म – भ्यम् । पयसा । पिन्वमानाः ।

प्रजावतीरिति प्रजा – वतीः । इन्द्र । **43 (50)**

**TS 7.4.17.2**

गोष्ठे रिरीहि ॥

प्रजापतिर्मह्यमेता रराणो विश्वैर्देवैः पितृभिः सँविदानः ।

शिवाः सतीरुप नो गोष्ठमा ऽक स्तासाँ वयं प्रजया स० सदेम ॥

इह धृतिः स्वाहेह विधृतिः स्वाहेह रन्तिः स्वाहेह रमतिः स्वाहा

महीमू षु सुत्रामाणं ॥ **44**

## TS 7.4.17.2 - Padam

गोष्ठ इति गो - स्थे । रिरीहि ॥ प्रजापतिरिति प्रजा-पतिः । मह्यम् ।

एताः । रराणः । विश्वैः । देवैः । पितृभिरिति पितृ - भिः । सँविदान

इति सं - विदानः ॥ शिवाः । सतीः । उपेति । नः । गोष्ठमिति

गो - स्थम् । एति । अकः । तासाम् । वयम् । प्रजयेति प्र-जया ।

समिति । सदेम ॥ इह । धृतिः । स्वाहा । इह ।

विधृतिरिति वि - धृतिः । स्वाहा । इह । रन्तिः । स्वाहा । इह ।

रमतिः । स्वाहा । महीम् । उ । स्विति । सुत्रामाणमिति

सु - त्रामाणम् ॥ **44 (38)** *(इन्द्रा - ष्टात्रिंशच्च) (A17)*

## TS 7.4.18.1

किꣳ स्विदासीत् पूर्वचित्तिः किꣳ स्विदासीद्-बृहद्-वयः ।

किꣳ स्विदासीत् पिशंगिला किꣳ स्विदासीत् पिलिप्पिला ॥

द्यौ-रासीत् पूर्वचित्तिरश्व आसीद् बृहद्-वयः ।

रात्रिरासीत् पिशङ्गिला ऽवि-रासीत् पिलिप्पिला ॥

कः स्विदेकाकी चरति क उ स्विज्जायते पुनः ।

कि७ स्विद्धिमस्य भेषजं कि७ स्विदावपनं महत् ॥

सूर्य एकाकी चरति – [ ] **45**

**TS 7.4.18.1 - Padam**

किम् । स्वित् । आसीत् । पूर्वचित्तिरिति पूर्व – चित्तिः । किम् । स्वित् । आसीत् । बृहत् । वयः ॥ किम् । स्वित् । आसीत् । पिशङ्गिला । किम् । स्वित् । आसीत् । पिलिप्पिला ॥ द्यौः । आसीत् । पूर्वचित्तिरिति पूर्व – चित्तिः । अश्वः । आसीत् । बृहत् । वयः ॥ रात्रिः । आसीत् । पिशङ्गिला । अविः । आसीत् । पिलिप्पिला ॥ कः । स्वित् । एकाकी । चरति । कः । उ । स्वित् । जायते । पुनः ॥ किम् । स्वित् । हिमस्य । भेषजम् । किम् । स्वित् । आवपनमित्या – वपनम् । महत् ॥ सूर्यः । एकाकी । चरति । **45 (50)**

**TS 7.4.18.2**

चन्द्रमा जायते पुनः ।

अग्निर्. हिमस्य भेषजं भूमिरावपनं महत् ॥

पृच्छामि त्वा परमन्तं पृथिव्याः पृच्छामि त्वा भुवनस्य नाभिं ।

पृच्छामि त्वा वृष्णो अश्वस्य रेतः पृच्छामि वाचः परमं ँव्योम ॥

वेदिमाहुः परमन्तं पृथिव्या यज्ञमाहु र्भुवनस्य नाभिं ।

सोममाहुर्वृष्णो अश्वस्य रेतो ब्रह्मैव वाचः परमं ँव्योम ॥ **46**

**TS 7.4.18.2 - Padam**

चन्द्रमाः । जायते । पुनः ॥ अग्निः । हिमस्य । भेषजम् । भूमिः ।
आवपनमित्या – वपनम् । महत् ॥ पृच्छामि । त्वा । परम् । अन्तम् ।
पृथिव्याः । पृच्छामि । त्वा । भुवनस्य । नाभिम् ॥ पृच्छामि । त्वा ।
वृष्णः । अश्वस्य । रेतः । पृच्छामि । वाचः । परमम् । व्योमेति
वि – ओम ॥ वेदिम् । आहुः । परम् । अन्तम् । पृथिव्याः ।
यज्ञम् । आहुः । भुवनस्य । नाभिम् ॥ सोमम् । आहुः । वृष्णः ।
अश्वस्य । रेतः । ब्रह्म । एव । वाचः । परमम् ।
व्योमेति वि – ओम ॥ **46 (46)**

*(सूर्य एकाकी चरति – षट्चत्वारिꣳशच्च) (A18)*

**TS 7.4.19.1**

अंबे अंबाल्यंबिके न मा नयति कश्चन ।

ससस्त्यश्वकः ॥

सुभगे कांपीलवासिनि सुवर्गे लोके सं प्रोर्ण्वाथां ।

आ ऽहमजानि गर्भधमा त्वमजासि गर्भधं ॥

तौ सह चतुरः पदः सं प्र सारयावहै ॥

वृषा वाꣳ रेतोधा रेतो दधातूथ् सक्थ्योर्गृदं धेह्यञ्जि–मुदञ्जिमन्वज ।

यः स्त्रीणां जीवभोजनो य आसां – [ ] 47

**TS 7.4.19.1 - Padam**

अंबे । अम्बालि । अम्बिके । न । मा । नयति । कः । चन ॥

ससस्ति । अश्वकः ॥ सुभग इति सु – भगे । काम्पीलवासिनीति

काम्पील – वासिनि । सुवर्ग इति सुवः–गे । लोके । सम् । प्रेति ।

ऊर्ण्वाथाम् ॥ एति । अहम् । अजानि । गर्भधमिति गर्भ – धम् ।

एति । त्वम् । अजासि । गर्भधमिति गर्भ – धम् ॥ तौ । सह ।

चतुरः । पदः । सम् । प्रेति । सारयावहै ॥ वृषा । वाम् । रेतोधा इति

रेतः – धाः । रेतः । दधातु । उदिति । सक्थ्योः । गृदम् । धेहि ।

अञ्जिम् । उदञ्जिमित्युत्–अञ्जिम् । अन्विति । अज ॥ यः ।

स्त्रीणाम् । जीवभोजन इति जीव – भोजनः । यः ।

आसाम् । **47 (50)**

**<u>TS 7.4.19.2</u>**

बिलधावनः ।

प्रियः स्त्रीणामपीच्यः ॥

य आसां कृष्णे लक्ष्मणि सर्दिगृदिं परावधीत् ॥

अंबे अंबाल्यंबिके न मा यभति कश्चन ।

ससस्त्यश्वकः ॥

ऊर्द्ध्वा–मेनामुच्छ्रयताद्–वेणुभारं गिराविव ।

अथास्या मद्ध्य–मेधता॒ शीते वाते पुनन्निव ॥

अंबे अंबाल्यंबिके न मा यभति कश्चन ।

ससस्त्यश्वकः ॥

यद्धरिणी यवमत्ति न – [ ] **48**

**TS 7.4.19.2 - Padam**

बिलधावन इति बिल – धावनः ॥ प्रियः । स्त्रीणाम् । अपीच्यः ॥

यः । आसाम् । कृष्णे । लक्ष्मणि । सर्दिगृदिम् । परावधीदिति

परा – अवधीत् ॥ अम्बे । अम्बालि । अम्बिके । न । मा । यभति ।

कः । चन ॥ ससस्ति । अश्वकः ॥ ऊर्द्ध्वाम् । एनाम् । उदिति ।

श्रयतात् । वेणुभारमिति वेणु–भारम् । गिरौ । इव ॥ अथ । अस्याः ।

मद्ध्यम् । एधताम् । शीते । वाते । पुनन्न् । इव ॥ अम्बे ।

अम्बालि । अम्बिके । न । मा । यभति । कः । चन ॥ ससस्ति ।

अश्वकः ॥ यत् । हरिणी । यवम् । अत्ति । न । **48 (50)**

**TS 7.4.19.3**

पुष्टं पशु मन्यते ।

शूद्रा यदर्यजारा न पोषाय धनायति ॥

अंबे अंबाल्यंबिके न मा यभति कश्चन ।

ससस्त्यश्वकः ॥

इयं ँयका शकुन्तिका ऽऽहलमिति सर्पति ।

आहतं गभे पसो नि जल्गुलीति धाणिका ॥

अंबे अंबाल्यंबिके न मा यभति कश्चन ।

ससस्त्यश्वकः ॥

माता च ते पिता च ते ऽग्रं ँवृक्षस्य रोहतः ( ) । **49**

**TS 7.4.19.3 - Padam**

पुष्टम् । पशु । मन्यते ॥ शूद्रा । यत् । अर्यजारेत्यर्य – जारा । न ।

पोषाय । धनायति ॥ अम्बे । अम्बालि । अम्बिके । न । मा । यभति ।

कः । चन ॥ ससस्ति । अश्वकः ॥ इयम् । यका । शकुन्तिका ।

आहलमित्या–हलम् । इति । सर्पति ॥ आहतमित्या–हतम् । गभे ।

पसः । नीति । जल्गुलीति । धाणिका ॥ अम्बे । अम्बालि ।

अम्बिके । न । मा । यभति । कः । चन ॥ ससस्ति । अश्वकः ॥

माता । च । ते । पिता । च । ते । अग्रम् ।

वृक्षस्य । रोहतः ( ) ॥ **49 (50)**

**TS 7.4.19.4**

प्र सुलामीति ते पिता गभे मुष्टि–मतꣳसयत् ॥

दधिक्राव्.ण्णो अकारिषं जिष्णोरश्वस्य वाजिनः ।

सुरभि नो मुखा करत् प्र ण आयूꣳषि तारिषत् ॥

आपो हि ष्ठा मयोभुवस्ता न ऊर्जे दधातन ।

महे रणाय चक्षसे ॥

यो वः शिवतमो रसस्तस्य भाजयतेह नः ।

उशतीरिव मातरः ॥

तस्मा अरं गमाम वो यस्य क्षयाय जिन्वथ ( ) ।

आपो जनयथा च नः ॥ **50**

**TS 7.4.19.4 - Padam**

प्रेति । सुलामि । इति । ते । पिता । गभे । मुष्टिम् । अतꣳसयत् ॥

दधिक्राव्.ण्ण इति दधि–क्राव्.ण्णः । अकारिषम् । जिष्णोः । अश्वस्य ।

वाजिनः ॥ सुरभि । नः । मुखा । करत् । प्रेति । नः । आयूꣳषि ।

तारिषत् ॥ आपः । हि । स्थ । मयोभुव इति मयः – भुवः । ताः ।

नः । ऊर्जे । दधातन ॥ महे । रणाय । चक्षसे ॥ यः । वः ।

शिवतम इति शिव – तमः । रसः । तस्य । भाजयत । इह । नः ॥

उशतीः । इव । मातरः ॥ तस्मै । अरम् । गमाम । वः । यस्य ।

क्षयाय । जिन्वथ ( ) ॥ आपः । जनयथ । च । नः ॥ **50 (54)**

*(आसा – मत्ति न – रोहतो – जिन्वथ – चत्वारि च) (A19)*

**TS 7.4.20.1**

भूर्भुवः सुवर्वसव स्त्वा ऽञ्जन्तु गायत्रेण छन्दसा रुद्रास्त्वा ऽञ्जन्तु

त्रैष्टुभेन छन्दसा ऽऽदित्या स्त्वा ऽञ्जन्तु जागतेन छन्दसा यद्–वातो

अपो अगमदिन्द्रस्य तनुवं प्रियां ।

एत॰ स्तोतरेतेन पथा पुनरश्वमा वर्तयासि नः ॥

लाजी(**3**)ञ्छाची(**3**)न्. यशो ममाँ(**4**) ।

यव्यायै गव्याया एतद्–देवा अन्नमत्तैतदन्नमद्धि प्रजापते ॥

युञ्जन्ति ब्रद्ध्न ( )–मरुषं चरन्तं परि तस्थुषः ।

रोचन्ते रोचना दिवि ॥

युञ्जन्त्यस्य काम्या हरी विपक्षसा रथे ।

शोणा धृष्णू नृवाहसा ॥
केतुं कृण्वन्नकेतवे पेशो मर्या अपेशसे ।
समुषद्भिरजायथाः ॥ **51**

**TS 7.4.20.1 - Padam**

भूः । भुवः । सुवः । वसवः । त्वा । अञ्जन्तु । गायत्रेण । छन्दसा । रुद्राः । त्वा । अञ्जन्तु । त्रैष्टुभेन । छन्दसा । आदित्याः । त्वा । अञ्जन्तु । जागतेन । छन्दसा । यत् । वातः । अपः । अगमत् । इन्द्रस्य । तनुवम् । प्रियाम् ॥ एतम् । स्तोतः । एतेन । पथा । पुनः । अश्वम् । एति । वर्तयासि । नः ॥ लाजी(3)न् । शाची(3)न् । यशः । ममाँ(4) ॥ यव्यायै । गव्यायै । एतत् । देवाः । अन्नम् । अत्त । एतत् । अन्नम् । अद्धि । प्रजापत इति प्रजा – पते ॥ युञ्जन्ति । ब्रद्ध्नम् ( ) । अरुषम् । चरन्तम् । परीति । तस्थुषः ॥ रोचन्ते । रोचना । दिवि ॥ युञ्जन्ति । अस्य । काम्या । हरी इति । विपक्षसेति वि – पक्षसा । रथे ॥ शोणा । धृष्णू इति । नृवाहसेति नृ–वाहसा ॥

केतुम् । कृण्वन्न् । अकेतवे । पेशः । मर्याः । अपेशसे ॥ समिति । उषद्भिरित्युषत् – भिः । अजायथाः ॥ **51 (75)**

*(ब्रध्नं – पञ्चविꣳशतिश्च) (A20)*

**TS 7.4.21.1**

प्राणाय स्वाहा व्यानाय स्वाहा ऽपानाय स्वाहा स्नावभ्यः स्वाहा सन्तानेभ्यः स्वाहा परिसन्तानेभ्यः स्वाहा पर्वभ्यः स्वाहा सन्धानेभ्यः स्वाहा शरीरेभ्यः स्वाहा यज्ञाय स्वाहा दक्षिणाभ्यः स्वाहा सुवर्गाय स्वाहा लोकाय स्वाहा सर्वस्मै स्वाहा ॥ **52**

**TS 7.4.21.1 - Padam**

प्राणायेति प्र – अनाय । स्वाहा । व्यानायेति वि – अनाय । स्वाहा । अपानायेत्यप – अनाय । स्वाहा । स्नावभ्य इति स्नाव – भ्यः । स्वाहा । सन्तानेभ्य इति सं – तानेभ्यः । स्वाहा । परिसन्तानेभ्य इति परि – सन्तानेभ्यः । स्वाहा । पर्वभ्य इति पर्व–भ्यः । स्वाहा । सन्धानेभ्य इति सं – धानेभ्यः । स्वाहा । शरीरेभ्यः । स्वाहा । यज्ञाय । स्वाहा । दक्षिणाभ्यः । स्वाहा । सुवर्गायेति सुवः – गाय । स्वाहा । लोकाय । स्वाहा । सर्वस्मै । स्वाहा ॥ **52 (28)**

*(प्राणाया - ष्टावि॑ꣳशतिः) (A21)*

**TS 7.4.22.1**

सिताय स्वाहा ऽसि॑ताय स्वाहा ऽभि॑हिताय स्वाहा ऽन॑भिहिताय स्वाहा॑

युक्ताय स्वाहा ऽयु॑क्ताय स्वाहा सुयु॑क्ताय स्वाहोद्यु॑क्ताय स्वाहा

वि॑मुक्ताय स्वाहा प्र॑मुक्ताय स्वाहा वञ्च॑ते स्वाहा परिव॑ञ्चते स्वाहा॑

सꣳव॑ञ्चते स्वाहा॑ ऽनुव॑ञ्चते स्वाहोद् -वञ्च॑ते स्वाहा॑ यते स्वाहा

धाव॑ते स्वाहा॑ तिष्ठ॑ते स्वाहा॑ सर्व॑स्मै स्वाहा॒ ॥ **53**

**TS 7.4.22.1 - Padam**

सिता॑य । स्वाहा॒ । असि॑ताय । स्वाहा॒ । अभिहि॑तायेत्यभि - हिताय ।

स्वाहा॒ । अन॑भिहितायेत्यन॑भि - हिताय । स्वाहा॒ । युक्ता॑य । स्वाहा॒ ।

अयु॑क्ताय । स्वाहा॒ । सुयु॑क्तायेति सु - युक्ताय । स्वाहा॒ ।

उद्यु॑क्तायेत्युत् - युक्ताय । स्वाहा॒ । विमु॑क्तायेति वि - मुक्ताय ।

स्वाहा॒ । प्रमु॑क्तायेति प्र - मुक्ताय । स्वाहा॒ । वञ्च॑ते । स्वाहा॒ ।

परिव॑ञ्चत इति परि - वञ्च॑ते । स्वाहा॒ । सꣳव॑ञ्चत इति

सं - वञ्च॑ते । स्वाहा॒ । अनुव॑ञ्चत इत्यनु - वञ्च॑ते । स्वाहा॒ ।

उद्वञ्चत इत्युत्–वञ्चते । स्वाहा । यते । स्वाहा । धावते । स्वाहा ।
तिष्ठते । स्वाहा । सर्वस्मै । स्वाहा ॥ **53 (38)**

*(सिताया – ष्षात्रिꣳशत्) (A22)*

==============

**Prasna Korvai with starting Padams of 1 to 22 Anuvaakams :-**

(बृहस्पतिः श्रद् – यथा वा – ऋक्षा वै – प्रजापतिर्येनयेन – द्वे वाव देवसत्रे – आदित्या अकामयन्त सुवर्गं – वँसिष्ठः – सँवथ्सराय –सुवर्गं यँये सत्रं – ब्रह्मवादिनोऽतिरात्रो – ज्योतिष्टोमं – मेषः – कूप्याभ्यो – ऽद्भ्यो – यो – नमो – मयोभूः – किँ स्विद – म्बे – भूः – प्राणाय – सिताय – द्वाविँशतिः)

**Korvai with starting Padams of 1, 11, 21 Series of Panchaatis :-**

(बृहस्पतिः – प्रति तिष्ठन्ति – वै दशरात्रेण – सुवर्गं – यँयो अर्वन्तं – भू – स्त्रिपञ्चाशत्)

**First and Last Padam of Fourth Prasnam of 7th Kandam**

(बृहस्पतिः – सर्वस्मै स्वाहा)

॥ हरिः ओं ॥

॥ कृष्ण यजुर्वेदीय तैत्तिरीय संहितायां पद पाठे सप्तमकाण्डे चतुर्थः प्रश्नः समाप्तः ॥

**Details of Panchati and Padam for Kandam 7, Prasanam 4 (TS 7.4)**

| | Panchati | Padams |
|---|---|---|
| Anuvakam 1 | 3 | 145 |
| Anuvakam 2 | 5 | 274 |
| Anuvakam 3 | 6 | 299 |
| Anuvakam 4 | 3 | 172 |
| Anuvakam 5 | 4 | 217 |
| Anuvakam 6 | 3 | 136 |
| Anuvakam 7 | 3 | 172 |
| Anuvakam 8 | 3 | 134 |
| Anuvakam 9 | 1 | 50 |
| Anuvakam 10 | 2 | 99 |
| Anuvakam 11 | 4 | 208 |
| Anuvakam 12 | 1 | 36 |
| Anuvakam 13 | 1 | 40 |
| Anuvakam 14 | 1 | 29 |
| Anuvakam 15 | 1 | 52 |
| Anuvakam 16 | 1 | 29 |
| Anuvakam 17 | 2 | 88 |
| Anuvakam 18 | 2 | 96 |
| Anuvakam 19 | 4 | 204 |
| Anuvakam 20 | 1 | 75 |
| Anuvakam 21 | 1 | 28 |
| Anuvakam 22 | 1 | 38 |
| Total → | 53 | 2621 |

**Notes:**

1. **Please refer to the book “TS Kandam 1” and “TS 1.1 pada paadam with Vaakyam” for notes and conventions used in this Compilation.**
2. **Please download our vedic compilations from our web site www.vedavms.in**